No. 16.

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. Oxon.
PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

SPANDAPRADÎPIKÂ

OF

UTPALÂCHÂRYA

A COMMENTARY ON THE SPANDAKÂRIKÂ

EDITED BY

PANDIT VÂMAN S'ÂSTRÎ ISLÂMPURKAR
OF BOMBAY.

VOL. XIV.

PRINTED, PUBLISHED AND SOLD BY
E. J. LAZARUS & Co., BENARES.
MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ AND M. SPIRGATIS LEIPZIG:
LUZAC AND CO, LONDON.

1898.

PRICE 12 Annas.

No. 16.

THE

VIZIANAGRAM SANSKRIT SERIES

UNDER THE SUPERINTENDENCE OF

ARTHUR VENIS M. A. OXON.

PRINCIPAL, SANSKRIT COLLEGE, BENARES.

THE

SPANDAPRADÎPIKÂ

OF

UTPALÂCHÂRYA

A COMMENTARY ON THE SPANDAKÂRIKÂ

EDITED BY

PANDIT VÂMAN ŚÂSTRÎ ISLÂMPURKAR
OF BOMBAY.

VOL. XIV.

PRINTED, PUBLISHED AND SOLD BY
E. J. LAZARUS & Co., BENARES.
MAY BE HAD FROM GANESH DAS AND CO., CHOWK, BENARES:
JAYESTHARAM MUKUNDJI AND CO., BOMBAY:
OTTO HARRASSOWITZ AND M. SPIRGATIS LEIPZIG:
LUZAC AND CO., LONDON.

1898.

भट्टश्रीकल्लटसङ्कलितस्पन्दकारिकाव्याख्या ।

स्पन्दप्रदीपिका ।

काश्मीरकश्रीमदुत्पलाचार्यविरचिता ।

सा च

मुंबईनिवासिना
पण्डित वामनशास्त्री इस्लामपुरकर
इत्यभिधेन संशोधिता ।

काश्याम्
मेडिकलहालमुद्रायन्त्रालये मुद्रिता प्रकाशिता च ।

शकाब्दाः १८२० ।

PREFACE.

This the first edition of the Spandapradîpikâ, is based on two MSS., distinguished in the notes as *A*. and *B*. MS. *A*. belongs to me: MS. *B*. was purchased for the Bombay Government by Hofrath G. Bühler during his memorable tour through Kaśmîr in 1875. Both MSS. are written on Kaśmîri paper in devanâgarî character, and bear no date. Utpala, the author of the work, belongs probably to the first half of the tenth century (cf. Bühler's Tour &c. 1877, p. 79).

The Spanda system is closely related to that of the Tantras and to the Pratyabhijnâdarśana of Abhinavagupta (circ. 1,000 A. D.). Some account of it is given in the Sarvadarśanasaṁgraha under the heading S'aivadarśana (cf. Bühler pp. 78-79). A fuller discussion of the Spanda School and of the seven MSS. of works connected therewith (which I was fortunate enough to acquire while touring through Kaśmîr in 1884-85) I trust may be permitted me on some future occasion.

The present volume, small though it is, has been long delayed owing to the Plague in Western India where my lot is cast.

14th April, 1898. V. S. I.

Authors and Works mentioned in the स्पन्दप्रदीपिका.

* ईश्वरप्रत्यभिज्ञा and प्रत्यभिज्ञा may possibly be the same.

† तत्वयुक्तिः and युक्तिः may possibly be the same.

* ईश्वरप्रत्यभिज्ञा and प्रत्यभिज्ञा may possibly be the same.

† तत्त्वयुक्तिः and युक्तिः may possibly be the same.

उत्पलाचार्यविरचिता ।

स्पन्दप्रदीपिका ।

॥ ओं स्वस्ति ॥

॥ नमः श्रीगणेशाय ॥

ओम् ।

यत् परापरभूस्पर्शि यत्सङ्कल्पाल्लयोदयौ ।
स्पन्दसंज्ञं चद्रूपं तच्छक्तीशं स्वबलं नुमः ॥ १ ॥

नत्वा विकल्पविलसत्[1]सत्स्वभावगुरुं गुरुम् ।
भुक्तिमुक्त्यै युक्तियुक्तं किञ्चिद्धच्मर्यर्थितो ऽर्थिभिः ॥ २ ॥

ज्ञानान्तराणि सन्त्याशु नात्यन्तसुखदानि तु ।
मुक्तात्मज्ञानममृतं सुरेष्विव मृत्युजित्[2] ॥ ३ ॥

चिन्तामणिस्त्वेक एव सगुणेष्वमणिष्विव ।
तेजस्विषु यथैको ऽर्को निःशेषध्वान्तहा तथा ॥ ४ ॥

नारायणस्थानसंस्थद्विजवर्यत्रिविक्रमात् ।
जातो जनानुग्रहार्थं व्याख्याति स्पन्दमुत्पलः ॥ ५ ॥

मायाश्यामतमश्छन्न आत्मचिन्तामणिर्यतः ।
न दृश्यते ऽतस्तत्प्राप्त्यै ग्राह्या स्पन्दप्रदीपिका ॥ ६ ॥

अयमत्र किलाम्नायः सिद्धमुखेनागतं रहस्यं यत् ।
तद् भट्टकल्लटेन्दुर्वसुगुप्तगुरोरवाप्य, शिष्याणाम्– ॥ ७ ॥
अवबोधार्थमनुष्टुप्छ्लोकिकया ऽत्र सङ्ग्रहं कृतवान् ।
यदपि तदर्थो व्याख्याज्योत्स्ना प्रकटीकृतो ऽस्ति तेनेषत्– ॥ ८ ॥
मोहनिशामध्यगता मन्ददृशस्तदपि नार्थमीक्षन्ते ।
सूक्ष्मं दीपिकयाऽन्ते स्वतस्तदुद्दीपनार्थमहमद्य ॥ ९ ॥

---

१. B. reads °विकसत्°. २. A. reads मत्युहृत् and in the margin चामतम्

स्वोद्यन्तृतः स्वरूपस्पन्दोल्लासेन चोदितश्च यदा ।
परवश इव प्रवृत्तस्तदा, न गर्वान्मयेयमारब्धा ॥ १० ॥

(कला[1]पकोऽयम्)

अत्रा[2]दौ तावत्सम्बन्धा-ऽभिधेय-वि[3]षय-प्रयोजनप्रयोजनानीति *षडुच्यन्ते । यतस्तैर्विना श्रोतॄणां शास्त्रम्प्रत्यनादर एव स्यादप्रयत्नश्च । इहैवोक्तं हि—

'प्रयत्नेन परीक्ष्यं तत्वमादरात्' ।

इति । शास्त्रमन्तरेण च हेयोपादेयविचारमात्रमपि न भवेत् । किं पुनस्तत्वपरीक्षणम् । तथा चोक्तमागमरहस्यस्तोत्रे—

'साक्षाद्भवान् यदि विधाय न मूर्तिमाद्यां
तत्वं निजं तदवदिष्यदतो ऽतिगुह्यम् ।
नाऽज्ञास्यत त्रिभुवनं ध्रुवमन्ध-मूक-
कल्पं समस्तमसमञ्जसतामयास्यत्' ॥

इति । षाड्गुण्यविवेके ऽपि—

'साक्षात् त्वमेव वा शास्त्रं त्वदीयैव हि सा मतिः ।
शब्दद्वारेण सङ्क्रम्य संस्करोत्यधिकारिणः' ॥

इति । पञ्चरात्रश्रुतावपि—

'यद्वत् सोपानेन प्रासादमारुहेत् प्लवेन वा
नदीं तरेत् तद्वच्छास्त्रेणैव हि भगवान्
शास्ता ऽवगन्तव्यः' ।

इति । तत्रामीषां शास्त्राणां सम्बन्धस्तावत् पञ्चविधः । परः महान् दिव्यः दिव्येतर इतरेतरश्चेति । तत्रेह सिद्ध-पुरुषयोः प्रायेण दिव्येतरः । अथ वाच्य-वाचकलक्षणः । वाच्योऽर्थः । वाचकं शास्त्रम् ।

---

१. A does not insert this. २. A. substitutes तत्र for अत्र. ३. B. does not insert °विषय° and A. does not repeat the word °प्रयोजन°.

* अत्र 'षडुच्यन्ते' इत्युक्तं तथापि सङ्ख्यया न तानि षड्भवन्ति । तदयं लेखकस्य ग्रन्थकर्तुरेव वा प्रमाद इति न ज्ञायते । बहुभिरन्यैरभियुक्तैर्व्याख्यारम्भे ऽनुबन्धचतुष्टयमेव वर्णितं दृश्यते । तत् आदर्शपुस्तकद्वयानुसारिणो मम न दोष इति क्षन्तुमर्हन्ति सूरयः ।

स्पन्दाभिधो ऽर्थो ऽत्र वाच्यः । तद्वाचकत्वाद् उपचारात् स्पन्दस्याप्येतत्संज्ञा । स्पन्दशब्दस्यार्थो यद्यप्याद्यश्लोके युक्त्यैवोक्तः तथापि धात्वर्थेन सहोच्यते ।

'स्पदि–किञ्चिच्चलने' ।

इति । स्पन्दनात् स्पन्दः । स्पन्दनं[1] च निस्तरङ्गस्यास्य तावत् परमात्मनः युगपन्निर्विकल्पा या सर्वतोन्मुख्यवृत्तिता । तस्मात्–

'शान्तषाड्गुण्यरूपस्य यत् स्फुरन् प्रति भोदयः ।
स चाऽऽत्म-बल-शक्तीशः चिद्रूपः स्पन्दसंज्ञकः' ॥

इति । अतश्चाऽस्मत्पितुर्मातामहाचार्येण महाबलेन–

'यथार्थनाम्नः क्रोधे' ।

इत्यादिनोक्तो विभवोदयो रहस्यस्तोत्रे । उक्तं चेश्वरप्रत्यभिज्ञायाम्–

'या चैषा प्रतिभा तत्तत्पदार्थक्रमरूषिता[2] ।
अक्रमानन्तचिद्रूपः प्रमाता स महेश्वरः ॥
व्यापकत्वात्स सामान्यः सर्वसाधारणादपि' ।

इति । अस्य च–

'स्पन्दः सामान्यपूर्वश्च शुद्धात्मा शङ्करः शिवः ।
भावः स्वभावः तत्वं च ज्ञातेत्याद्यभिधाः स्मृताः' ॥

इति । अन्यच्च, चित् संवित् ज्ञानं बोधश्चेति पर्यायाः । एष एव निरावरणचित्स्वरूपत्वाद् दिक्कालाद्यनवच्छिन्नप्रसरो ऽद्वितीयः स्वानुभवैकप्रमाणः शक्तिचक्रेश्वर आत्मचिन्तामणिः उपेयतया ऽभिधेयः । कुतोऽस्य चिन्तामणित्वम् ?–इति चेत् । शास्त्रात् । श्रीपौष्करायां ह्युक्तम्–

'चिन्तामणौ स्वरूपेण न किञ्चिदुपलभ्यते ।
अथ चाभिमतं सूते ब्रह्मैवं सर्वशक्तिकम्' ॥

इति । परमार्थसारे च–

'सर्वाकारो भगवानुपास्यते येन येन भावेन ।
तं तं भावं भूत्वा चिन्तामणिरिव समभ्येति' ॥

इति । ज्ञानसम्बोधे ऽपि–

---

१ A. omits च and reads स्पन्दने for स्पन्दनं. २. A. reads °दूषिता.

'स्वभावादेकरूपापि नानात्वं प्रतिपद्यते ।
ज्ञानस्य शक्तिः सङ्कल्पैर्लक्ष्मीश्चिन्तामणेरिव' ॥

इति । अस्य च शास्त्रकारेणान्वर्थसंज्ञया ऽऽत्यन्तिकश्रेयस्करत्वात् शिव-शङ्करशब्दाभ्यां निर्देशः कृतः । वस्तुतस्तु[1] निर्नामक एव [2]सः । प्रोक्तं चैत[3]त्सिद्धनाथेन अभेदा[4]र्थकारिकासु—

'वस्तुनो भावशून्यस्य त्वग्राह्यस्य निराकृतेः ।
कल्पनामात्रमेवैतत् यच्छिवव्यपदेशनम् ॥
नेत्थं विभोर्विवर्तो ऽस्ति परिणामश्च न क्वचित् ।
अथ वा द्वयमप्यस्तु तथाप्यस्य न खण्डना' ॥

इति । संवित्प्रकाशे ऽपि—

'इति निर्मलबोधैकरूपे देहपरिग्रहः ।
विवर्त परिणामाभ्यां द्वाभ्यामप्युपपद्यते ॥
विवर्ते[5]ऽप्यतथारूपस्तथा भासि त्वमच्युत ।
परिणामे स एव त्वं सुवर्णमिव कुण्डले' ॥

इति ।

ननु—कथमस्य निरावरणत्वम्? । यतः सुख-दुःख-मोहात्मकगुणादिस्पन्दनिष्पन्दैरावृतमेव पश्यामः । अत्रोच्यते । एते हि ज्ञेयत्वात् स्वयं निःसत्ताकाः । ज्ञातृसंश्रयात्तु लब्धप्रतिष्ठा इवाप्रबुद्धबुद्धीनां स्वं शुद्ध-बुद्ध-स्वरूपं विहाय अहम्प्रत्ययेन कामकामातादात्म्यम्प्रतिपन्नानां निजधर्मैरधिकस्य सङ्कोचरूपतामापादयन्त्यविद्यारूपत्वात् । न पुनः स्वस्वरूपस्थितानाम् । उक्तं चेहाय—

'गुणादिस्पन्द—' ।

इत्यादि । धातुसमीक्षायां च—

'अविद्याशबलस्यास्य स्थितं मेयत्वमात्मनः ।
गृहीतं न निजं रूपं शबलेन सदात्मना ॥

---

१. B. substitutes च for तु. २. B. does not insert सः. ३. B. omits एतत्.
४. A. reads अभेदकारिकासु. ५. B. reads. विवृत्तात्र°.

सा चाऽनृतात्मिका ऽविद्या नानृतस्य हि वस्तुता ।
नाऽवस्तु वस्तुनो नाशं विकारं वा करोत्यतः ॥
नाच्छादितस्य तमसा रज्जुखण्डस्य विक्रिया ।
नाशो वा क्रियते यद्वत् तद्वन्नाऽविद्ययाऽऽत्मनः ॥
नाऽतः स्वतो न परतो बन्धो ऽस्य परमात्मनः ।
बद्धो ऽयाऽविद्यया जीवो मुक्तिस्तस्य हि तत्त्वये' ॥

इति । तत्त्वयुक्तौ च–

'येन येन हि बध्नन्ते जन्तवो रौद्रकर्मणा ।
सोपायो न तु तेनैव मुच्यन्ते भवबन्धनात्' ॥

इति । कुलयुक्तौ च–

'प्राणिनां पतनं येन तेनैवोत्पतनं स्मृतम् ।
अज्ञस्तु[1] बध्यते येन ज्ञाता[2] तेनैव मुच्यते' ॥

इति । तथा मयाऽपि–

'सीदति येनैव जडः प्राज्ञस्तेनैव सन्तरति दुःखात् ।
पिण्डितमयोऽप्सु मज्जति तदेव पात्रीकृतं प्लवते' ॥

इति । गीतासु चेदृगेवाऽत्र युक्त्योपायः प्रदर्शितः–

'आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत् ।
तद्वत्कामा यं प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी' ॥
(भ॰ गी॰ २. ७०)

इति । तथा–

'राग-द्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति' ॥
(भ॰ गी॰ २. ६४)

इति । अन्यच्च–

'असन्त्यक्तात्मभावानां विषयाननुगृह्णताम् ।
विज्ञातपरमार्थानां जीवतामेव मुक्तता ॥
ते चैवास्यात्मनः स्पन्दो नटस्येवान्यरूपता' ।

इति । उक्तं च योगिनाथेन ह्येतच्चिच्छक्तिसंस्तुतौ–

---

१. B. reads अज्ञस्त्वं. २. B. reads ज्ञात्वा.

'तदेवं त्वत्प्रवृत्त्या त्वन्निवृत्त्या चोदयेतरे ।
जुषन्ते येन तत्वानि तान्यतः स्पन्द एव ते ।
वैसादृश्येऽपि कार्यस्याऽस्याच दृष्टान्तमाह यत्– ॥
ज्वलनाद्धूमोद्गतिरिव विविधाकृतिरम्बरे गता भाति ।
तद्वद्विष्णोः सृष्टिः स्वभावजा द्वैतरूपेऽयम् ॥
प्राश्यानश्छिद्रसस्यौघः साकारत्वमुपागतः ।
अवश्यायः प्रबोधार्के तूदिते स्वस्वभावभाक्' ॥

इत्यलमतिविस्तरेण । ग्रन्थगौरवभयात् । इह चैतदेवाऽऽसमाप्तेर्वि- चार्यते । उपायोपेयप्रतिपादनमेव शास्त्रस्य प्रयोजनम् । या तदवबोधादु- पेयस्वरूपापत्तिः स्थिरा तदेव प्रयोजनप्रयोजनमिति । अस्य चेदं दर्शनं स्वतन्त्रम् । प्रागुक्तोपपत्त्या सर्वशास्त्रसमुद्भूतं चाद्वैतप्रतिपादकत्वं निर्बाध- मेव । यतो विमर्शात्मस्पन्दभूम्युपारोहात् पश्यन्त्यादिक्रमेण वाक्प्रसवलाभः । उक्तं च संवित्प्रकाशे–

'संविन्मूलाद्वर्णरूपाज्ज्ञातस्तम्भात् सरस्वती ।
प्रागघोषा सनादाऽनु पुण्यतीर्था प्रवर्तते ॥
तत्प्रवृत्त्या प्राणयति शक्तिः सा विश्वमोजसा ।
प्रतियान्ती पुनस्त्वासां संकोचयति सम्भवम् ॥
कार्यानुरूपं सा रूपं तथा नामापि बिभ्रती ।
निर्वाहयति विश्वस्मिंश्चिचां याचां चराचराम्' ॥

इति । तद्विना च सर्ववादिनां सत्तैव नास्ति । अतस्ते निरस्ता एव स्थिताः । अत एवेश्वरप्रत्यभिज्ञायामादिसिद्धिरित्युक्तम् –

'कर्तरि ज्ञातरि स्वात्मन्यादिसिद्धे महेश्वरे ।
अजडात्मा निषेधं वा सिद्धिं वा विदधीत कः ?' ॥

इति । तदप्यच ये मोहाद्विप्रतिपद्यन्ते तेष्विदमापतितम् । यथा कश्चिन्माण्डलिको राजा चक्रवर्तिनः सकाशात् किञ्चिच्चतुरङ्गादि साधनं प्रार्थ्यानन्तरं साम्राज्यजिगीषया तेनैव सह युद्धं कर्तुमिच्छति तद् आत्मविना- शायैव तस्य स्यात् । एवं तेषामपि तत् । इत्थमप्यस्याजय्यत्वं सिद्धमेवेति ।

१. A. reads चराचरे. २. B. reads काक्वा which is meaningless.

अथ सङ्ग्रहग्रन्थकृता समग्रमप्यग्रन्थार्थं गर्भीकृत्य ग्रन्थनिष्पत्त्यर्थमभिमतदेवतां स्तोतुं यः—श्लोक उपन्यस्तस्तस्यार्थः प्राक्श्लोके ध्वनितोऽपि वितत्योच्यते—

यस्योन्मेष-निमेषाभ्यां जगतः प्रलयोदयौ ।
तं शक्तिचक्रविभवप्रभवं शङ्करं स्तुमः* ॥ १ ॥

इति । तं भगवन्तं शङ्करं स्तुमः नुमः । भोगापवर्गाख्यं शं श्रेयः सुखं वा करोतीति शङ्करः । अमलःस्वस्वभावः यः प्रागभिधेय[1] तयोपात्तः । इह हि जीवन्मुक्ततैव मोक्षः । उक्तं चेहाऽग्रे—

'इति वा यस्य संवित्तिः' ।

इत्यादि । तस्याश्चैतद् द्वयमप्यन्तस्थम् । यतः सा ज्ञत्व-कर्तृत्व-भोक्तृत्वेश्वरतारूपा । उक्तं चेह—

'तदास्याकृत्रिमो धर्मः' ।

इत्यादि । तथा—

'यदा त्वेकत्र' ।

इत्यादि । सर्वज्ञभैरवे च—

'नान्यत्र गमनं स्थानं मोक्षोऽस्ति सुरसुन्दरि ।
अज्ञानग्रन्थिभेदो यः स मोक्ष इति कथ्यते' ॥

इति । मोक्षधर्मेषु—

'चित्तमेव हि संसारो रागादिक्लेशभूषितम् ।
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते' ॥

इति । बौद्धे च—

'रागादिमलिनं चित्तं संसारस्तद्विविक्तता ।
संक्षेपात् कथितो मोक्षः प्रहीनावरणैर्जिनैः' ॥

इति । नारदसङ्ग्रहे च—

'सर्वो विकल्पः संसारो नान्यो अन्यो विकल्पतः[3]' ।

इति । ग्रन्थकर्तुश्च स्वस्वभावसम्बोधने—

---

१. B. reads °धेय उपोपात्तः. २. A. reads भवान्त. ३. B. reads विकल्पः for विकल्पतः.

* 'विज्ञानदेहात्मकस्य शक्तिचक्रैश्वर्यस्योत्पत्तिहेतुत्वं नमस्कारद्वारेण प्रतिपाद्यते'—इत्युक्तेर्वृत्तिकर्तुः 'नुम' इत्येव पाठः सम्मत इति दृश्यते ।

'बन्धनं बन्धकृद्बद्धस्त्रिष्वप्येको न [१]भिद्यते ।
स्वविकल्पकृतैर्बन्धैर्बद्धते त्वनिशं जगत्' ॥

इति । आत्मसप्ततौ च—

'वस्तुस्थित्या न बन्धोऽस्ति तदभावान्न मुक्तता ।
विकल्पघटितावेतावुभावपि न किंच न' ॥

इति । पञ्चरात्रेऽपि—

'त्रिविधो दोषः । स्वभावजस्तामसो विकल्पजो राजसः' ।

इत्यादि—'यावत्तेनैव देहेन वशीभवति भगवद्भूतस्तदा
सर्वज्ञो भवति सर्वदर्शी सर्वेश्वरः सर्वशक्तिः' ।

इत्यादि । अत एवाऽत्र भगवच्छब्दः प्रयुक्तः । यतः—

'ऐश्वर्यस्य समग्रस्य ज्ञानस्य यशसः श्रियः ।
वैराग्यस्य च मोक्षस्य षण्णां भग इति स्मृतः[२] ॥
भगवद्व्यतिरेकेण न च स्तुत्योऽस्ति मानिनाम्' ।

इति । तत्स्वरूपानुप्रवेश एव स्तुतिः । अत्र त्वभिन्नत्वमेवाभिम[३]तम् । अन्यथा कः स्तोता? कः स्त्युत्यः? का वा स्तुतिः? । यस्मात्—

'विरुद्धमेतदद्वैतात् स्वच्छायोल्लङ्घनं यथा' ।

इति । उक्तं च—

'वेद्यं स्वरूपतां नीत्वा यदा जानन्ति वेदनम् ।
तदानीं वेद्यता का स्यात्? का वा वेदनता परा'? ॥

इति । केवलं त्वत्र शब्दकृतो भेदः । सोऽपि विकल्पमूलत्वात्तेषाम् । उक्तं च—

'विकल्पयोनयः शब्दा विकल्पाः शब्दयोनयः ।
यथा 'राहोः शिर' इति धारा वा सर्पिषो यथा' ॥

इति । अन्यच्च—

'यदभिन्नं स्वसंवित्तौ तत् परस्य यदोच्यते ।
तदभिन्नमिवाभाति शाब्दीं भूमिमुपागतम्' ॥

इति । उक्तै[४]र्विना व्यवहारोऽपि न निर्वहति । उक्तं संवित्प्रकाशे—

---

१. B. reads विद्यते. २. A. reads द्दतीर्यते. ३. B. reads स्वभिरतम् for अभिन्नत्व-मेवाभिमतम्. ४. B. reads उच्चैः°

'वागेवास्याः कारणं विश्ववृत्तेर्न्याय्यं चैतन्नागमः केवलोऽयम् ।
नाऽसङ्कल्पं किंचिदस्तीह कार्यं वाचं विना न विकल्पोऽस्ति कश्चित्' ॥

इति । एषाऽपि बोधमूलेति प्रागेवोक्तम् । अन्यच्च जयाख्यसंहितायाम्–

'निष्कम्पबोधसामान्यरूपो माता पुरा स्वयम् ।
ये शब्दजनिता भावाः सूक्ष्मसूक्ष्मतराखिलाः ॥
सामान्यबोधशब्दस्य पश्यतस्त्वेकतां गताः ।
यदाऽभिमुखमायान्ति सङ्कल्पाद्युत्थितस्य च ॥
शब्दरूपपदार्थस्य शब्दः स परमः स्मृतः ।
सङ्कल्पपदवीरूढः स्फुरत्यन्तः स्थितः स्फुटम् ॥
पदार्थोपरमः शब्दो मध्यमं विद्धि तं मुने ।
चिद्वायुकरणोत्थासु प्रयत्नपदवीषु च ॥
वाच्य-वाचकभावेनाऽभिव्यक्तः स्थूल उच्यते ।
दृश्यादृश्येषु भावेषु योऽभिव्यक्तिं प्रयाति च ॥
स तु स्थूलतरश्चैव व्यवहारेऽखिले स्थितः' ।

इति । अन्यत्राऽपि–

'शरीरजो वा शाब्दो वा मानसो वा समुद्गतः ।
व्यवहारोऽप्यसौ नास्ति यत्र त्वं नाथ नाग्रगः' ॥

इति । उपपन्नमेतत् । तं स्तुम इत्युक्तं तं कम् ? यदुन्मेषादौन्मुख्याज्जगतो विश्वस्योदयः प्रभवः सन्ततिरिति यावत् । निमेषाद्विश्रामात् प्रलयोऽप्ययः । न ह्येतद्व्यतिरिक्तस्य जगतोऽस्त्युदयोऽप्ययो वा ।

'किन्त्वीशशक्तिप्रसर विरामौ प्रभवाप्ययौ' ।

इति सिद्धम्[१] । उक्तं च–

'समुदेति जगदशेषं तवोदयविमलसंविदाकारे ।
अस्तं याति समस्तं पुनरपि निजरूपरूढायाः' ॥

इति । ग्रन्थकृताप्युक्तं तत्वविचारे–

'शक्तिप्रसर-सङ्कोचनिबद्धावुदय-व्ययौ ।
यस्यात्मा स शिवो ज्ञेयः सर्वभावप्रवर्तकः' ॥

इति । कक्ष्यास्तोत्रेऽपि–

१. B. reads सिद्धोक्तम् for इति सिद्धम् । उक्तं.

'त्वदाशयोन्मेष-निमेषमात्रमयौ जगत्सर्ग-लयाविर्तीदृक् ।
स्फुटे, स्फुटं त्वन्महिमाऽवभाति विचित्रनिर्माणनिदर्शनेन ॥
ज्ञानक्रियादिगर्भेच्छाशक्तिर्यः प्रसरात्मकः ।
सङ्कल्पोक्तः स उन्मेषः प्रोक्तं ह्येतत्स्वतन्त्रके ॥
यत्र यत्र भवेदिच्छा ज्ञानं तत्र प्रवर्तते ।
क्रिया-करणसंयोगात् पदार्थस्योदयो भवेत्' ॥

इति । तद्विरतिश्च निमेषः । उदय-प्रलयाविति वक्तव्ये प्रलयोदयाविति यदुक्तम् तद्वृत्तभङ्गभयात् । विपर्ययेण चोन्मेषशब्दस्य मङ्गलार्थत्वादादिप्रयोगः । सृष्टेश्चाद्यत्वात् ।

'यस्माद्वस्त्वभिधेयं नातः शब्दक्रमेऽत्र भवबन्धः ।
तत्पद्यो नीचः स्याद्ये तु ब्रुवते यथासंख्यम्' ॥

इति । आभ्यामस्य जगत्सृष्टि-संहारयोः कारणभावः प्रोक्तो भुक्ति-मुक्ती च । तत्रोन्मेषाद्भोगो नानाविधः । निमेषान्मोक्षो निस्तरङ्गरूपता । अन्यच्च । तं किंभूतम्? । शक्तिचक्रविभवप्रभवमिति ।

'इच्छाख्यैका विभोः शक्तिः प्राग्द्विधा ज्ञ-क्रियाभिदा' ।

इति । तन्नानात्वं चक्रशब्देनोक्तम् । तदुक्तं मालिनीविजये—

'या सा शक्तिर्जगद्धातुः कथिता समवायिनी ।
इच्छात्वं तस्य सा देवि सिसृक्षोः प्रतिपद्यते ॥
सैकाऽपि सत्यनैकत्वं यथा गच्छति तच्छृणु ।
एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितम् ॥
ज्ञापयन्ती जगत्यत्र ज्ञानशक्तिर्निगद्यते ।
एवं भवत्विदं सर्वमिति कार्योन्मुखी यदा ॥
जाता तदैव सा तद्वत्कुर्वन्त्यपि क्रियोच्यते ।
एवमेषा द्विरूपाऽपि पुनर्भेदैरनेकताम्— ॥
अर्थोपाधिवशाद्याति चिन्तामणिरिवेश्वरी ।
तत्र मातृत्वमापन्ना पञ्चाशद्वर्णमालिनी' ॥

इति । शक्तीनां चक्रं शक्तिचक्रं मातृवर्गः । तच्च मुख्यं चतुर्विधम् । उक्तं च—

'खेचरी गोचरी चाऽथ दिक्चरी भूचरीभिदा ।
परादिभारतीसंस्थं शक्तिचक्रं चतुर्विधम्' ॥

इति । तथा—

'आनन्देच्छा-ज्ञ-क्रियाख्यं खेचर्याद्यं चतुष्टयम्' ।

इति । तस्य यो विभवो विभूतिर्विस्तरो वा तस्याऽपि प्रभवम् । प्रभवत्यस्मादिति प्रभव उत्पत्तिस्थानम् । यतः सर्वासां शक्तीनां सस्फारचिच्छक्त्यवगमनाच्छक्तित्वम् । सा च तदभिन्नैव । प्रोक्तं हि श्रीजयायाम्—

'तत्व निर्मुक्तदेहस्य केवलस्य चिदात्मनः ।
य उदेति महानन्दः सा शक्तिर्वैष्णवी परा' ॥

इति । विष्णुयामले च—

'पाहि पाहीति वचनात्त्राणातस्वविग्रहाः ।
परापरबलस्पर्शात् स्वस्वरूपसमाश्रयात् ॥
निहता दानववराः परं वीर्यं प्रकाशितम् ।
तेन ता मातरः प्रोक्ता विश्वसम्भवकारणात्'[1] ॥

इति । अत एव ग्रन्थकारेणासां विज्ञानदेहात्मकत्वमुक्तम् । अथ वा अलमत्र । किमनेनासां रहस्यस्वरूपातिप्रकाशनेन योगिनीनां मुखगतेन । शक्तयश्च खेचर्याद्या वेच्छाद्या वा पराद्या वा अघोराद्या वा वामाद्या वा ब्राह्म्याद्या वा अन्या वैष्णव-शैव-सौर-बौद्धाद्युक्ता वा । अथ वा 'शब्दराशिसमुत्थस्य' इत्यादिना[2] वक्ष्यमाणअकाराद्यक्षररूपा[3]: करणरूपा[4] वा भवन्तु । एतावत् प्रयोजनमत्र—आभिर्यदासां सर्वासां स्पन्दरूपो भगवानेव प्रभव इति प्रतिपादनम् । तथा च मायावामनसंहितायाम्—विष्णु-शिव-सूर्य-बुद्धादिरूपतया तत्तच्छक्तिचक्रपरिवारयुतस्तत्कारणं भगवानेक एव ध्यानभेदेनोपास्यत्वेनाभिहितः । उक्तं च कुलयुक्तौ—

'वेदान्ते[5] वैष्णवे शैवे सौरे बौद्धे ऽन्यतोऽपि च ।
एक एव परःस्वात्मा ज्ञाता ज्ञेयं महेश्वरि' ॥

इति । अन्यच्च—

---

१. A. reads °कारणाः. २. A. inserts वा after इत्यादिना. ३. A. reads °साद्यप्रकारा.° ४. A. reads कारणरूपाः. ५. B. reads वेदान्त°.

यस्योन्मेष-निमेषाभ्यां जगतः प्रलयोदयौ

इति 'तं स्तुम' इत्येतावता सर्वमुक्तं स्यात् । अत्यन्तस्फुरणाच्छक्ति-चक्रस्य । उक्तं हि रहस्यशास्त्रेषु—

'शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते ।
शक्त[1]यश्च जगत् सर्वं शक्तिमांस्तु महेश्वरः' ॥

इति । यत्तु 'शक्तिचक्रविभवप्रभवम्' इति पदमुपन्यस्तं तदुद्देशार्थम् । साभिप्रायत्वान्महाकवेः । उक्तं च ध्वनौ—

'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत् प्रसिद्धावयवातिरिक्तमाभाति लावण्यमिवाङ्गनासु ॥
तेनैतदेवशक्तीनां यतोऽन्तः प्रसरोदयौ ।
तदुल्लालम्भनात्तासां प्रभुत्वं प्राप्यते चिरात्' ॥

इति । उक्तं चेह—

'अपित्वात्मबलस्पर्शात् पुरुषस्तत्समो भवेत्' ।

इति ।

यदिदं पदमग्रेऽस्ति परीक्ष्यं तत्वमादरात् ।
इतः प्रभृति सर्वत्रेहानुयोज्यं तु तद्बुधैः ॥

इति ॥ १ ॥

ननु—संसार्यवस्थायां कथं तस्क[2]रताऽऽत्मनि ? ।
इत्याशङ्कोत्थदुर्दोषपरिहाराय तूच्यते ॥ —

यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।
तस्यानावृतरूपत्वान्न नि[3]रोधोऽस्ति कुत्रचित् ॥ २ ॥

इति । यत्र यस्मिन् स्पन्दतत्वे इदं सर्वं जगल्लक्षणं ज्ञानरूपतया शक्त्यात्मना स्थितं निमेषावस्थायां तस्यानावृतरूपत्वाद् बोधरूपतयाऽनाच्छादितस्वरूपत्वाद्धेतोर्न कुत्रचिन्निरोधोऽस्ति । यतो बोद्धुस्य स्वयं सत्तैव नास्ति । अबोधरूपमनावृत्तमेवावस्थाद्वयेऽपि । उक्तं च—

---

१. A. reads शक्तं यच्च for शक्तयश्च, २. B. has शस्करता. but it is difficult to find out what the first letter was. ३. A. reads. विरोधो.

'यथा हेम्नो रूपकेषु वैचित्र्यं स्वान्न रिच्यते ।
अथ नित्यस्वरूपस्य तथा ते विश्वरूपता ॥
यथा गलितरूपस्य हेम्नः पिण्डात्मना स्थितिः ।
तथा गलितवेद्यस्य तव शुद्धचिदात्मता' ॥

इति । ज्ञानसम्बोधेऽपि–

'विश्वस्याश्रय आकाशं न विश्वं नभसो भवेत् ।
ज्ञानं नभइवानन्तं ज्ञेयं विश्ववदल्पकम् ॥
आकाशस्येव वाऽन्येन प्रतिबन्धो न केन चित् ।
व्यापित्वात् तद्वदस्यापि ज्ञानस्याऽप्रतिबन्धता' ॥

इति ॥ २ ॥

सर्ववृत्त्युपसंहारो निरोधो मास्तु तस्य तु ।
जाग्रदाद्यास्ववस्थासु कुतः स्यादनिरुद्धता ? ॥–

जाग्रदादिविभेदेऽपि तदभिन्ने प्रसर्पति ।
निवर्तते निजान्नैव स्वभावादुपलब्धृतः ॥ ३ ॥

इति । जाग्रदादिविभेदे प्रसर्पति प्रसरत्यपि सति तत् स्पन्दतत्त्वं निजादात्मीयात् स्वभावादुपलब्धृरूपात् स्वसंवित्स्वरूपान्नैव निवर्तते । कुतः ? उपलब्धृतो हेतोर्वा । यस्मादुपलब्धृरूपत्वं तिसृष्वप्यवस्थासु साधारणम् । उक्तं च–

'अवस्थास्वेव भेदोऽयं नाऽवस्थातुः कदाचन ।
यथा विषस्याङ्कुरादौ तच्छक्तेर्नतु भिन्नता' ॥

इति । जाग्रत्स्वप्नयोस्तावत्संवेदनं सर्वेषां प्रसिद्धमेव सुषुप्ते[१]रुत्तरकालं 'सुखमहमस्वाप्सम्'–इत्याद्यत्रस्याऽपि संवेदनात् संवेत्ता निर्दिष्ट एव भवति । उक्तं च–

'वेल्लत्सु प्रतिबिम्बेषु जलस्पन्दानुवर्तिषु ।
यथेन्दोर्न क्रियावेशस्तथा ऽत्र परमात्मनः' ॥

इति । अन्यच्च । विभेदे विशेषेण भेदो विभेदः तस्मिन् । किंभूते ? तदभिन्ने । तस्यैव ताद्रूप्येणावस्थानात् । तथा च–

१. B. reads सुषुप्तेष्युत्तर°

'अचैर्योऽर्थग्रहो द्रष्टुस्तज्जाग्रदिति कथ्यते ।
यत्तैर्विनार्थस्मरणं मनसा स्वप्नसंज्ञितम् ॥
यथार्थ-स्मरणे नष्टस्तत् सैाषुप्तमुदाहृतम् ।
शुद्धबोधैकरूपा योऽवस्थाता सैव तुर्यता' ॥

इति ॥ ३ ॥

अवस्था एव विश्रान्तनावस्थातेति ये जगुः ।
प्रत्यभिज्ञादियुक्त्येयं तन्निरासाय कारिका ॥—

अहं सुखी च दुःखी च रक्तश्चेत्यादिसंविदः ।
सुखाद्यवस्थानुस्यूते वर्तन्ते ऽन्यत्र ताः स्फुटम् ॥ ४ ॥

इति । अहं सुखीत्याद्याः याः संविदः संवेदनानि अवस्थाः । ताः संविद्भ्योऽन्यत्र संवेत्तर्यवस्यातरि सुखाद्युपलब्धरि उपरागतया स्फुटं कृत्वा वर्तन्तेऽवतिष्ठन्ते । संवेत्तारं विना संवेदनस्याऽभावात् ।

'नद्योऽब्धाविव तादात्म्यं तत्प्रविष्टाः प्रयान्ति वा ।
चणिकज्ञानिनां ह्यव नतु ता एव केवलाः' ॥

इति । यस्मात्—

'कार्य-कारणभावो हि बाध्य-बाधकताऽपि च ।
पूर्वापरैकमातारमन्तरेण प्रसिद्ध्यतः' ॥

इति । तत्र हि—

'प्रामाण्यं चणिकत्वेन प्रत्यचेणोपपद्यते ।
प्राग्भावादुत्तरज्ञानदार्ढ्यात् प्रामाण्यसिद्धितः ॥
प्रतिचणमथान्यत्वात् सामान्यस्याग्रहे सति ।
विलचणाः चणाः सर्वे प्रामाण्य किंनिबन्धनम् ? ॥
सम्बन्धस्याग्रहश्चापि तेन मानस्य का गतिः ? ।
मिथ्याज्ञानस्य मिथ्यात्वं ब्रूहि वा किंनिबन्धनम् ? ॥
चणान्तरे शुक्तिकायां रजतं केन वार्यते ? ।
भिन्नज्ञानस्य कर्तृत्वे सर्वे प्रामाण्यमाप्नुयात् ॥

१. B. reads प्रागभावा°

अन्यस्वरूपसंसिद्धावन्यसिद्धिर्भवेद्यदि ।
घटस्वरूपसंसिद्धौ पटस्यावगमो भवेत् ॥
यो ऽयं स एवाऽयमिति प्रत्ययः स्थिरकालजः ।
कर्तुं शक्यो न तद्बादिप्रामाण्यात् क्षणिकैस्ततः ॥
प्राग्विज्ञानस्मृतिं प्रत्यभिज्ञा नित्यं प्रतिष्ठिता ।
अतो नित्यस्वभावस्यैवात्मनः कर्तृतोदिता'

इति । किं वा बहूक्त्या—

'एकप्रमातृभावात् स्यात् क्षणिकत्वादनिश्चयात् ।
प्रमाणमप्यप्रमाणं स्यात् बौद्धानां हि निराश्रयम्' ॥

इति । उक्तं च बौद्धायनसंहितायाम्—

'कार्य-कारणभावस्तु नास्ति ज्ञाने क्षणक्षयः ।
क्षणं द्वितीयं नास्ते चेत् स्मृतिर्बीजं कथं भवेत्? ॥
जनकं तत् कथं नष्टमनष्टं वाप्यनष्टकम् ।
नष्टस्य जनकत्वं चेदभावाद्भावसन्ततिः ॥
जनकत्वे त्वनष्टस्य क्षणभङ्गः प्रहीयते ।
द्वितीयं यत्क्षणं तिष्ठेत्तदास्ते शतमप्यथ ॥
जनकत्वेऽर्थनिष्ठस्य अर्थे नाऽभावमेति तत् ।
तस्माद्भावाः स्थिराः सर्वे न च्यवन्ते स्वरूपतः ॥
आत्मावबोधविषये स्वस्थिराः क्षणिका न ते ।
बाध्य-बाधकभावेऽपि न स्यान्निश्चायकंविना ॥
शुक्तौ हि रजतज्ञानभ्रान्तिभङ्गोऽस्ति नान्यथा ।
तस्माज्ज्ञानं नित्यमेकं क्षणिकानि बहूनि नो' ॥

इति । सत्कार्यसिद्धौ च—

'न हि स्वनिष्ठे विज्ञाने इतरेतरवेदनम् ।
तस्मात् पूर्वापरावस्था (प्रमाण[२]) परिपिण्डितः ॥—
एकः प्रमाता चित्राभिर्वृत्तिभिर्व्यवहारभाक्' ।

इति । प्रत्यभिज्ञायां च—

१. A. substitutes चः. २. Both manuscripts omit three letters here.

'एवमन्योन्यभिन्नानामपरंपरवेदिनाम् ।
ज्ञानानामनुसन्धानजन्मा नश्येज्जनस्थितिः ॥
न चेदन्तःकृतानन्तविश्वरूपो महेश्वरः ।
स्यादेकश्चिद्वपुर्ज्ञान-स्मृत्यपोहनशक्तिमान्' ॥

इति । गीतास्वपि—

'मत्तः स्मृतिर्ज्ञानमपोहनं च'

(भ॰ गी॰ १५॰ १५.)

इत्यलं कुतर्काश्मनां चर्वणेन । अन्यच्च । किंभूते संवेत्तरि ? सुखाद्यवस्थासु बोद्धृरूपतयानुस्यूतेऽनुविद्धे । मणिषु सूत्रमिव सदानुस्यूते एव सर्वास्ववस्थासु । यस्माद्य एवाहं प्राक्सुखी स[1]एवाद्य दुःखी । आदिग्रहणाद्रक्तोऽहं विरक्तोहं मूढोऽहं प्रबुद्धोऽहं धनादिमानहमिति स्मृतिप्रत्यभिज्ञानुसन्धानात् । नन्वेवमसौ सावरणः । नैतत्सत्यम् । विकल्परूपतया तासामनित्यत्वात् । तद्व्यतिरिक्तत्वाच्च संवेत्तुः तास्वविद्यावरणादुपरागमात्रस्य । उक्तं च भर्तृहरिणा—

'नाच्छादितस्य तमसा रज्जुखण्डस्य विक्रिया ।
नाशो वा क्रियते यद्वत्तद्वन्नाविद्ययाऽऽत्मनः' ॥

इति । संवित्प्रकाशे च—

'अत्यन्ताच्छस्वभावत्वात्स्फटिकस्य यथा स्वकम् ।
रूपं परोपरक्तस्य नित्यमेवोपलभ्यते ॥
तथा भावसमासक्तं भगवंस्तावकं वपुः ।
अत्यन्तनिर्मलतया पृथक्त्[2]नोपलभ्यते ॥
नैतावताऽसौ स्फटिकः पृथङ्नास्त्येव रञ्जकात् ।
भावरूपपरित्यक्ता तव वा निर्मला तनुः' ॥

इति । [3]तथा—

'उपरागेऽपि शुद्धत्वं न त्यक्तमनया प्रभो ।
परित्यज्य निजं रूपं संविदाख्यां कुतश्च यत् ॥

---

१. B. does not add स°. it reads स वाद्य. २. A. reads पृथक्त्वैः. ३. A. reads यथा,

अथाऽप्राप्यैव तद्रूपं भवेद्रूपान्तरानुगा ।
तद्रूपापि हि दृश्येत कारणेऽस्याऽपि सम्भवात्' ॥

तथाचैव—

'सदैव[१] शुद्धोऽनुभवो यम्प्रत्याकारकर्बुरः ।
आकारान्तरसङ्कारकाले तस्यापि निर्मलः ॥
यथा जात्या सितं वस्त्रं रक्तं रागेण केन चित् ।
तत्पदप्राप्तशुक्लत्वं[२] पुना रागान्तरं श्रयेत् ॥
एवं शुद्धा चितिर्जात्या यदाकारोपरागिणी ।
तत्यागापरसङ्कारमध्ये शुद्धैव तिष्ठति' ॥

इति । तथा—

'नीले पीते सुखे दुःखे चित्स्वरूपमखण्डितम् ।
विभिनष्टि विकल्पस्तच्चित्रयोपाधिसम्पदा' ॥

इति ॥ ४ ॥

तद्व्यतिरिक्तस्य च रूपमाह—

न दुःखं न सुखं यत्र न ग्राह्यं ग्राहकं न च ।
न चास्ति मूढभावोऽपि तदस्ति परमार्थतः ॥ ५ ॥

इति । तत् स्पन्दतत्वं परमार्थतोऽस्ति । नित्यत्वात्तस्य । यत्र न दुःखमाध्यात्मिकादि । न सुखं वैषयिकम् । न ग्राह्यं घट-पटादि । न ग्राहकमहमिदं गृह्णामीति प्राकृतं सविकल्पाहङ्काररूपत्वमविद्यात्मकत्वादहङ्कारस्य । न त्वनेनाधिष्ठातृरूपस्य ग्राहकस्याभाव उक्तः । उपेयत्वात्तस्य । उक्तं च तत्वगर्भे—

'परमार्थेन न ग्राह्यं ग्राहकं वा न किंचन ।
यस्मादृते तत् स्वभासमस्वाभासमिवेक्ष्यते' ॥

इति । एवं तर्हि तत् पाषाणप्रख्यं मूढत्वमेव शून्यं वा? अत्रोच्यते—

नचास्ति मूढभावोऽपि

इति । कुतः? चिद्रूपत्वात् । उक्तं च मुनिना—

---

१ B. reads सदेव. २. A. reads °शुक्तत्वं.

२

'यथा शीतोष्णयोर्मध्ये काले नोष्णो न शीतलः ।
एवं हि सुख-दुःखाभ्यां हीनमस्ति पदं विभोः' ॥

इति । स्तुतौ च—

'समुदेति यथा भोवधिना भानुर्नभस्तले ।
वेद्यं विनैव भगवन् भवान् केन स्वतोदयः' ॥

इति । तथा—

'यथोद्धृतविशेषस्य सामान्यस्य निजा स्थितिः ।
पृथङ् न शक्या निर्देष्टुं न च तत्राऽस्ति तावता ॥
एवं नित्या निजा शुद्धा सुख-दुःखाविशेषिता ।
स्वसंवेदनसंवेद्या तव संविन्मयी स्थितिः' ॥

इति । नागार्जुनेनाप्युक्तम्—

'सर्वालम्बनधर्मैश्च सर्वतत्त्वैरशेषतः ।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः' ॥

इति । आलोकमालायां च—

'विरुद्धत्वात्तमोवृत्तेर्नावकाशं ददाति या ।
साऽवस्था काऽप्यविज्ञेया मादृशा शून्यतोच्यते ॥
न पुनर्लोकरूढयैव नास्तिक्यार्थानुपातिनी' ।

इति ॥ ५ ॥

अथास्याऽमूढत्वा-ऽस्तित्वयोः सन्दानितकेनोपपत्तिमाह—

यतः करणवर्गो ऽयं विमूढो मूढवत्स्वयम् ।
सहान्तरेण चक्रेण प्रवृत्ति-स्थिति-संहृतीः—॥ ६ ॥
लभते, तत् प्रयत्नेन परीक्ष्यं तत्वमादरात् ।
यतः स्वतन्त्रता तस्य सर्वत्रेयमकृत्रिमा ॥ ७ ॥

इति । यतो यस्मात् स्पन्दतत्वादयं बाह्यः करणवर्गो बुद्धि-कर्मेन्द्रियाख्योऽन्तःकरणचक्रेण सह विशेषेण मूढचेतनो विचेतनवत् स्वयं प्रवृत्ति-स्थिति-संहृतीर्लभते ।

१. A. reads संव°. २. B. reads द्यतो°.

एषोपपत्तिहेतुस्तु दृष्टान्तो भ्रामको मणिः ।
यथा वाताग्निसंपर्कादयःपिण्डोऽग्निवद्भवेत् ॥
दाह-पाक-प्रकाशादौ शक्तस्तद्वदयं गणः ।

इति । एवं योऽन्येषां चैतन्यापादने समर्थः स कथं निःस्वभावः ? उक्तं षाड्गुण्यविवेके—

'स्वदेहसाक्षिकं चैतत् सर्वस्य ज्ञानचेष्टितम् ।
ज्ञानानधिष्ठितः कायो लुठत्येव यतो धृतः ॥
अत एव जडानामप्यधिष्ठातृकृता धृतिः ।
गम्यते गगने ग्रावा न धार्यतेऽन्यथा कथम्'? ॥

इति । तस्मात्तत् तत्वं प्रयत्नेनादरात्परीक्ष्यम् । प्रयत्न उद्योगरूप उत्साहः । आदरः श्रद्धा । अत्र च परीक्षणमुद्योगबलानुप्रवेशेन स्वीकरणम् । उक्तं चेह—

'अतः सततमुद्युक्तः'—

इत्यादिना । सिद्धोक्तं च—

'अदृश्यं नेत्रवद् ब्रह्म दृष्टृत्वं चाऽस्ति नेत्रवत् ।
स्वात्मन्येवोपलम्भोऽस्य दर्शनं घटवन्न तु' ॥

इति । यतो यस्मात्तस्येयमकृत्रिमा निजैव स्वतन्त्रता सर्वत्र । तेनैतदुक्तम्—यथास्य करणादिषु चैतन्यापादेन स्वातन्त्र्यं तथा परपुरादिष्वपि सम्भाव्यते ऽभ्यासात् ॥ ७ ॥

तदिच्छयास्तु सामर्थ्ये करणानां स्वतन्त्रता ।
सर्वत्रोक्ताऽस्य या सा तु भक्तियुक्तिरतस्त्वियम्— ॥

नहीच्छानोदनस्यायं प्रेरकत्वेन वर्तते ।
अपित्वात्म[1]बलस्पर्शात् पुरुषस्तत्समो भवेत् ॥ ८ ॥

इति । अयं पुरुषो जीवात्मा नेच्छानोदनस्य नेच्छाप्रेषणस्य करण[2]चक्रचोदकस्यैव केवलं प्रेरकभावेन वर्तते । हिशब्द एवशब्दार्थेऽत्र केवलशब्दार्थे वा । अपि त्विति निपातः प्रतिषेधनिवृत्तौ स्वरूपद्योतकः । आत्म-

१. B. substitutes °स° for °म°. २. A. does not insert °चक्र°.

नो बलमात्मबलं निरावरणचिद्रूपं ज्ञत्व-कर्तृत्वलक्षणम् । तत्स्पर्शात्तदवष्टम्भात् तत्समो भवेत् । सर्वज्ञः सर्वकर्ता स्यादित्यर्थः ॥ ८ ॥

अनेन सर्वं स्वातन्त्र्यमुक्तमस्य च तद्भवेत् ।
अभिमानात्मकक्षोभक्षयेन त्वन्यमाह च–॥

निजाशुद्ध्यासमर्थस्य कर्तव्येष्वभिलाषिणः ।
यदा क्षोभः प्रलीयेत तदा स्यात्परमं पदम् ॥ ९ ॥

इति । निजा सहजा । अनादिर्याऽशुद्धिरविद्याऽविवेकमूला भोगाभिलाषमलरूपतयाऽसमर्थस्य सङ्कुचितशक्तेः । अत एव च कर्तव्येषु कार्येष्वभिलाषिणः साभिलाषस्य सतो न कार्यमिच्छतोऽपि भवति । तथा च श्रीसात्वता–

'अज्ञता व्यापकत्वं च सुख-दुःखादिवेदनम् ।
सर्वज्ञस्यात्मतत्वस्य कर्मचक्रावलम्बनात् ॥
गतीस्त्वेषा प्रकृत्याख्या शुद्धिः प्राक्कर्मवासना ।
माया ऽविद्या भ्रमो मोहो ज्ञानं मलमिति क्वचित्' ॥

इति । गीतं च–

'प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान्' ॥

इति । (भ॰ गी॰ १३॰ १९)

'अनादित्वे समानेस्याविशेषोऽयं विचारतः' ।

इति । लयो यन्मायारूपत्वात् । तदुक्तं संवित्प्रकाशे–

'मायात्वमेतदेव स्यान्नाशस्तत्वप्रदर्शनात् ।
नहि विज्ञातरज्ज्वात्मा सर्पादीन्मन्यते पुनः' ॥

इति । अन्यच्च च

'त्वत्तो द्वितीयमिह वस्तु यदस्ति किंचित्तद्विचारपदवीमवतारितं चेत् ।
गन्धर्वपत्तनमिवोपलयं प्रयाति त्वं शिष्यसे ध्रुवमतस्तव शेषसंज्ञा' ॥

इति । विद्याधिपतेश्च–

'भक्तणप्रकृतिना समाधिना युक्तितो विषयधाम्नि भेदिते ।
सर्वभक्तपदवीमुपेयुषश्शिष्यते परमभक्तितो भवान् ॥
सा चेन्द्रजालिनो मायेवाऽऽस्थिता बाधकात्मनि ।
यथाऽग्नेर्धूमलेखेव मलवद्दर्पणस्य वा ॥
बुद्बुदाः सलिलस्येव तच्छान्तौ निर्विकारिता' ।

इति । यदा तु चोभो विकारोऽशुद्धिजनितो देहाहम्[2]प्रत्ययरूपो विवेकेनात्मबलस्पर्शात् प्रलीयते प्रलयं याति तदा स्यात् परमं पदं स्वस्वरूपे स्थितिर्भवेदित्यर्थः । उक्तं षड्धातुसमीक्षायाम्—

'कर्माणि मोहमूलानि संसृतेः कारणं यतः ।
तत्क्षयात् कर्मनिर्मुक्तः स्वस्थः शान्ततमस्ततः' ॥

इति । नारदसङ्ग्रहेऽपि—

'यथा सुभर्जितं बीजं नेह भूयः प्ररोहति ।
विकल्पक्षीणचित्तस्य तथा भूयो न संसृतिः' ॥

इति । स च क्षोभक्षयः शनैः शनैरभ्यासाद्भवेत् । उक्तं स्वात्मसम्बोधे—

'यथाऽग्निपाकं ज्वलनोद्धृतं सच्छैत्यं प्रयायाच्छनकैर्नं यथः ।
अज्ञानपङ्केऽपि तथा निरस्ते कालेन कैवल्यमुपैति देही' ॥

इति । षाड्गुण्यविवेकेऽप्यात्म-परमात्मनोरेतावान् भेदोऽभिहितः—

'अविद्याकृतसङ्कोचगृहीताहंयु[3]ताख्य या ।
तया ऽभिन्नोऽपि भिन्नोऽयं तत्वतः स्वप्नभीतवत् ॥
अभीत एव यः स्वप्ने बिभ्यदभ्येति सम्भ्रमम् ।
तस्य स्वप्नादभिन्नस्य को भेदः पारमार्थिकः? ॥
तथा हि मिथ्यैव भयं ममेति यदि बुद्ध्यते ।
स्वप्नतत्वं परामृश्य भीतिभिन्नैर्न बाध्यते ॥
एवं त्वन्मय एवाऽहमिति भावनया त्वयि ।
प्रलीनाऽहङ्कृतिग्रन्थिः पश्यत्येवं[4] त्वदात्मताम्' ॥

इति । संवित्प्रकाशे च—

---

१. B. reads भक्तते. २. A. reads देहोहं° for देहाहं°. ३. B. reads °द्युता°.
४. B. reads °त्वे°.

'कर्मेदं त्वत्कृतमपि त्वन्मयं येन माधव ।
विहीनाऽहङ्कृति ततस्त्वमेव परिशिष्यसे ॥
एतावतैव भेदोऽस्य यदहम्मानिताऽऽत्मनि ।
सा चेद्विलीना त्वद्भ्यक्त्या नष्टो भेदः स्थितैकता' ॥

इति ॥ ६ ॥

स्वरूपस्थस्य गुणानाह—

तदाऽस्याऽकृत्रिमो धर्मो ज्ञत्व-कर्तृत्वलक्षणः ।
यतस्तदीप्सितं सर्वं जानाति च करोति च ॥ १० ॥

इति । तदा तस्मिन् प्रलीनक्षोभात्मके काले ऽस्य आत्मनः स्वरूपस्थत्वात् अकृत्रिमः सहजो धर्मः स्वभावो भवतीति वाक्यशेषः । किंभूतः ? जानातीति ज्ञः । तस्य भावो ज्ञत्वम् । करोतीति कर्ता । कर्तुर्भावः कर्तृत्वम् । आभ्यां यो लक्ष्यते, एते वा लक्षणं रूपचिह्नं यस्य धर्मस्य स ज्ञत्व-कर्तृत्वलक्षणः । यतो यस्माद्धर्माद्धेतोर्वा यज्ज्ञातुमीप्सितमभिमतं तज्ज्ञानाय यत्[1] कर्तुमिष्टं तत् करोति स्वात्मनो वा परस्य वा । पञ्चरात्रे चैष एव धर्मो विवेकजज्ञानशब्देनोक्तः—

'तस्य च प्रादुर्भवतः किं पूर्वरूपं ? यत् सर्वज्ञो भवति सर्वदर्शी सर्वेश्वरः सर्वशक्तिः' ।

इति । स चास्य करणैर्विनाऽपि स्यात् । तत्रैवोक्तं हि—

'तद्यथा अग्निर्नाम कस्मिंश्चिद्दाह्ये नान्यत्किंचिदुपादत्ते तेन धक्ष्यामीति स्वयमेव दहति ।
एवमयमात्माऽनुपादाय ज्ञाताऽनुपादायकर्ता स्वात्मनैव सर्वकरः' ।

इति । कुतः ? बोधरूपत्वात् । षाड्गुण्यविवेके उक्तम्—

'न हि बोधो विचित्रार्थनिर्माणेऽन्यमपेक्षते ।
सङ्कल्पादेव यो रूपसहस्राणि सृजत्यजः' ॥

इति । येत्वस्य ज्ञत्व-कर्तृत्वादीन्यन्यतो वदन्ति तेषामनीशतैव स्यात् । उक्तं ह्यागमरहस्ये—

---

१. A. omits यत्.

'येऽपीश्वरं व्यपदिशन्ति निमित्तहेतुं तैरर्पितः स्थलजलाञ्जलिरीशितायै । अन्याङ्गनोपगमनेन वशीकृतस्य कामीश्वरस्थितिममी बत सङ्गिरन्ते'? ॥

इति । तस्माद्युक्तमुक्तम् ॥ १० ॥

अस्याऽकृत्रिमधर्मस्य स्थैर्यायोपाय उच्यते ।—

तमधिष्ठातृभावेन स्वभावमवलोकयन् ।
स्मयमान इवास्ते यस्तस्येयं कुसृतिः कुतः ? ॥ ११ ॥

इति । तं शुद्धमात्मस्वभावमधिष्ठातृभावेन चिद्रूपतया सर्वव्यापकत्वेनावलोकयन्पश्यन्प्रतिजानन् स्मयमान इव विस्मयाविष्ट इव विकसन्निव यस्तिष्ठति तस्य अविद्याविलयादियं कुतः कुसृतिः? कुत्सितसंसरणं न कुतश्चिद्भवतीति वाक्यशेषः । उक्तं च शिवसूत्रेषु—

'विस्मयो योगभूमिका' ।

इति । अस्य चैतदवलोकनं यद् द्रष्टृरूपतयाऽनुभवननम् । उक्तं हीष्टोपदेशे—

'यदिदं दृश्यते दृष्ट्या ग्रहं पुत्राऽच सन्त्यज ।
येन पश्यसि तं पश्य यं दृष्ट्वा पश्यसेऽखिलम्' ॥

इति । कश्चा चोक्तम्—

'यो जगुपश्चि एषु किंनु वीचोमा इत्थ करोत्रिषयाल विलुट्टि ।
एसे पत्तापत्त रावींचो आपलइयद अस्त्युवुट्टि' ॥

इति । तथाऽस्याऽन्यतः कुतः साभिलाषतया विकल्पशिल्पादिकुमार्गानुसरणम्? अपि त्वेवं सदैव स्वस्वरूपे स्थितिर्भवेत् । तत्स्थत्वाच्चेश्वरवत्सत्यसङ्कल्पः स्यादित्यतोऽस्मिन्नेवासती । यतोऽभ्यासं विना ज्ञा[1]तमपि स्वीकर्तुं न शक्यते । तदन्तरेण च कुतः सिद्धिः? । उक्तं मुनिना—

'यदि वाचनिकाद्ज्ञानान्मुक्तिः स्याद्भावनां विना ।
शारीर-मानसैर्दुःखैर्मुच्येरन् सर्वजन्तवः' ॥

इति । तथा तु युक्तौ—

'रसायनं विना स्वादात् सूचितं ह्यपि सिद्धिदम्' ।

इति । अन्यच्चोक्तम्—

---

१. A. reads ज्ञान°.

'आगोप-बाल-वनितं भगवंस्त्वमित्थं ज्ञातोऽप्युपायविरहान्न तु मोक्षदोऽसि। नान्तः स्थितं भवति धेनुषु तृड्विहर्तृ क्षीरं तदेव पुनरभ्यवहारतः स्यात्'॥ इति ॥ ११ ॥

तान्ध्वंसयितुमाहेदं[2] ये त्वाहुः शून्यवादिनः ।
अभावं भावयेत्तावद्यावत्तन्मयतां व्रजेत्– ॥

नाऽभावो भाव्यतामेति न च तत्रास्त्यमूढता ।
यतोऽभियोगसंस्पर्शात्तदासीदिति निश्चयः ॥ १२ ॥
अतस्तत्कृत्रिमं ज्ञेयं सौषुप्तपदवत् सदा ।
नत्वेवं स्मर्यमाणत्वं तत्तत्वं प्रतिपद्यते ॥ १३ ॥

(युगलकम् ।)

इति । नाऽभावः शशविषाणसदृशो भाव्यतामनुभवविषयत्त्वमेति प्राप्नोति। अवस्तुत्वात् । न च तत्राऽभावे अमूढतास्ति अपि तु मूढावस्थैव सा । यतोऽभियोगसंस्पर्शादभिलाषसंयोगात्तदभावभावनमासीदभूत् । अतीतमिति निश्चयः । यस्मात् सा मम शून्यावस्थातीतेति स्मर्यते । तदुक्तम्–

'अभावो येन भावेन बाध्यतेऽस्ति न नास्ति सः ।
तस्य भावस्य सद्भावो मम केन निवार्यते? ॥
सोऽस्त्यतश्चिन्मयो भावो येन सर्वं विभाव्यते' ।

इति । अतो हेतोस्तदभावभावनं कृत्रिममनित्यं सदा ज्ञेयम्। किमिव? सौषुप्तपदवत् सुषुप्तावस्थेव । नत्वेवं मूढावस्थावत् । तदा आत्मतत्वं स्मर्यमाणत्वं स्मर्तव्यतां प्रतिपद्यते गच्छति । स्मर्तृत्वाच्चिद्रूपस्य । नित्योदितत्वाच्च । तस्मात्तत्त्वं गुरूपदेशेनादरात् परीक्ष्यमिति ॥ १२–१३ ॥

एवम्–

अवस्थाद्वयमेवाऽस्ति[3] स्मर्तृ-स्मर्तव्यभेदतः ।
यतस्य नित्यानित्यत्वविचारायेदमुच्यते– ॥

अवस्थायुगलं[4] चाऽत्र कार्य-कर्तृत्वशब्दितम् ।
कार्यता क्षयिणी तत्र कर्तृत्वं पुनरक्षयम् ॥ १४ ॥

---

१. Both manuscripts read पितृहर्तृ. २. B. reads धूसयितुम्. ३. A. reads °मेवा°. ४. B. reads युगलं.

इति । अत्राऽस्मिन्पूर्वोक्ते स्पन्दतत्वे ऽवस्थायुगुलं दशाद्वयं यदस्ति कार्य-कर्तृत्वशब्दितं कार्य-कारणसंज्ञितं भोग्य-भोक्तृभेदभिन्नदृश्यदृष्टृभिदावेद्य-वेदकरूपम् । तत्र तयोरध्यासाद्या कार्यता सा क्षयिणी उत्पत्तिविनाशयुक्ता । यत्पुनः कर्तृत्वं तदक्षयम् । निरवधिचित्स्वरूपत्वात् ॥ १४ ॥

अत एव–

कार्योन्मुखः प्रयत्नो यः केवलं सोऽत्र लुप्यते ।
तस्मिँल्लुप्ते विलुप्तोऽस्मीत्यबुधः प्रतिपद्यते ॥ १५ ॥

इति । अत्रास्मिन्कार्ये बाह्येर्थे क्षयिणि सति कार्योन्मुखः कार्यसम्पादनाभिमुखो यः प्रयत्नो बाह्यकरणव्यापाररूपः स केवलं लुप्यते न लक्ष्यते न्यग्भूयेव स्वात्मन्यास्ते । स्थगितेन्द्रियस्य वा व्यापारासामर्थ्यात् । तस्मिन् प्रयत्ने लुप्ते सति–अस्मि अहं विलुप्तो नष्ट इत्यबुधोऽज्ञः प्रतिपद्यते जानाति । न तु चिद्रूपस्य विनाशोऽस्ति । उक्तं च–

'विज्ञप्तेर्न विनाशोऽस्ति विनष्टेऽपि शरीरके ।
अभावे सूर्यकान्तस्य नैवास्ति सवितुः क्षतिः' ॥

इति ॥ १५ ॥

कस्माच्चेत्याह–

न तु योऽन्तर्मुखो भावः सार्वज्ञ्यादिगुणास्पदम् ।
तस्य लोपः कदाचित् स्यादन्यस्यानुपलम्भनात् ॥ १६ ॥

इति । देश-कालादिविच्छिन्नस्य कार्यस्यैव लोपो निवृत्तिर्न तु योऽन्तर्मुखो भावो बहिरप्रसृतेः स्वस्वरूपस्थः स्वस्वभावः सर्वज्ञतादीनां गुणानामास्पदमाश्रयस्तस्य भावस्य लोपः कदाचित्स्याद्भवेत् उपपद्यते । कुतो न स्यात्? चिद्रूपं मुक्त्वा ऽन्यस्य द्वितीयस्याऽनुपलम्भनादनुपलब्धेः । तस्यैव हि सर्वत्र सर्वदोपलब्धिः । एतदुक्तम्–

'देश-काल-क्रियाकारैरवच्छिन्नेषु वस्तुषु ।
अनवच्छिन्नरूपस्त्वं भासि तस्य बहिःस्थितेः' ॥

इति । अत्र च–

---

१. A. reads निर्वाधचित्°. २. Both manuscripts read स एव, but it seems incorrect.

'भेदः सर्वज्ञतादीनां ज्ञानादीनां च नास्त्यमी ।
ज्ञानस्यैव धर्मतया चिद्रूपस्य स्थितिर्यतः' ॥

इति । उक्तं च षाड्गुण्यविवेके—

'गुणेषु ज्ञानमाद्यन्ते तेन तत्वेऽवधारिते ।
धर्मत्वेनेपिता शक्तिर्बल-वीर्यौजसां स्थितेः' ॥

इति । कल्याणस्तोत्रे च—

'ज्ञानं प्रशान्तं तव बोधवृत्तिरैश्वर्यमुद्यत्प्रसरा परेषाम् ।
प्रकाशनं प्रत्यपि योग्यरूपा शक्तिर्बहिःस्थैर्यवती बलं सा ॥
उत्पन्नबाह्यप्रसरां तु वीर्यं तेजश्च बाह्यानवभासयन्ति ।
षोढेत्थमेकैव तव स्वशक्तिर्बाह्यावमर्शात्तु भवेदविद्या ॥
तत्र सर्वज्ञता ज्ञानं सर्वं हि जायते ततः' ।

इति । तृप्तिर्बलम् । तथाहि—

'बलस्य तृप्तिमूलत्वात्त्वमस्य तदभावतः ।
अनादिबोधस्तेजोऽच बोधमूलं हि तत्सदा' ॥

इति । तदुक्तम्—

'प्रभावलक्षणं यच्च तेजः प्रव्हयते परान् ।
बोधत्वादेव तद्वेद्यं बोधं प्रव्हयते जगत् ॥
स्वतन्त्रताऽच चैश्वर्यं स्वातन्त्र्यादीश्वरस्य तु' ।

इति । तदुक्तम्—

'स्वतन्त्रः सर्वकृत्येषु न नियोज्यो न विघ्नवान् ।
प्रवृत्तोऽस्यप्रवृत्तो वा यतस्तेन त्वमीश्वरः ॥
वीर्यं सदा लुप्तशक्तिर्नाशाभावश्च तद्गतः' ।

इति । तदुक्तम्—

'आत्मसत्वापरिभ्रंशलक्षणाद्वीर्यमासत ।
वीर्यादेतच्च ते कार्येऽनन्वयः स्वर्णवच्च यः ।
अनन्तशक्तिः शक्तिः सा सामर्थ्यात्सर्वतः सदा' ॥

इति ॥ १६ ॥

तस्य तु क्व कस्योपलब्धिरित्याह–

तस्योपलब्धिः सततं त्रिपदाव्यभिचारिणी ।
नित्यं स्यात्सुप्रबुद्धस्य तदाद्यन्ते परस्य तु ॥ १७ ॥

इति । तस्य चिद्रूपस्यात्मनो योगिनः सततमुपलब्धिरनुभवो भवेत् । कीदृगस्य योगिनः ? नित्यं सदैव सुप्रबुद्धस्य । कीदृश्युपलब्धिः ? । त्रिपदाव्यभिचारिणी । त्रिष्वपि जाग्रदादिषु पदेष्ववस्थासु न या व्यभिचरति न निवर्तते सा तथोक्ता । कार्ये तु निर्भ्रान्तैव । उक्तं च–

'काप्यवस्था न ते साऽस्ति यस्यां संविन्न वर्तते ।
तेन चिद्घनमेव त्वां योगिनः पर्युपासते' ॥

इति । अपरस्य पुनरीषत्प्रबुद्धस्य प्रबुद्धस्य च । तदाद्यन्ते तदिति पदत्रयस्य परामर्शः । एतदुक्तम्–

'तदादौ प्रागवस्थायां (तदन्ते ऽपि) च तन्मये ।
पदं प्रत्ययवाद्यन्ते जाग्रतुर्येऽप्यवाऽऽगमात्' ॥

इति । अथवा तदादौ तदन्ते च तन्मध्ये जाग्रत्स्वप्नयोरित्यर्थः । यतः प्रबुद्धस्यैतयोरेव स्फुटोपलब्धिः संवेदनम् ॥ १७ ॥

सच तस्य क्व कथमिति स्फुटीकर्तुमाह–

ज्ञान-ज्ञेयस्वरूपिण्या शक्त्या परमया युतः ।
पदद्वये विभुर्भाति तदन्यत्र तु चिन्मयः ॥ १८ ॥

इति । विभुर्व्यापकः चिन्मयश्चिद्रूपः परमात्मा परमया शक्त्याऽत्युत्कृष्टेन सामर्थ्येन युक्तः । पदद्वये जाग्रत्स्वप्नात्मके भाति दीप्यते प्रकाशते । कीदृश्या शक्त्या ? ज्ञान-ज्ञेयभेदेन द्विरूपया । द्वैरूप्यात्त्वस्याः पारम्यम् । अत एवाऽस्मिन्नवस्थाद्वये द्विविधोपलब्धिः । तदन्यत्र पुनस्तस्मात्पदद्वयादन्यस्मिन्पदद्वये सुषुप्ततुर्याख्ये चिन्मयश्चिन्मात्र एव । ज्ञेयाभावाद्ध्ज्ञानस्वरूप एवेत्यर्थः ॥ १८ ॥

तस्योपलब्धिर्योक्ता सा गुणस्पन्दादिभिः स्थितेः ।
कुतस्त्या ? चेति सा शङ्का ये तान्प्रत्युच्यते त्विदम्– ॥

---

१. B. reads कीदृगो for कीदृगस्य. २. B. has the letter प्व quite illegible, it may be च, प्य or प्व.

गुणादिस्पन्दनिष्यन्दाः सामान्यस्पन्दसंश्रयात् ।
लब्धात्मलाभाः सततं स्युर्ज्ञस्यापरिपन्थिनः ॥ १९ ॥

इति । गुणाः सत्व-रजस्तमांसि । आदिग्रहणान्महदहङ्कार-तन्मात्रेन्द्रियभूतानि च । गुणादिश्चासौ स्पन्दः गुणादिस्पन्दः । तस्य ये निष्यन्दाः प्रवाहाः सुख-दुःख-मोहोर्मिज्ञानविशेषाः । तस्य प्रागुक्तलक्षणस्य सामान्यस्पन्दस्यान्तर्लीनाऽनन्तविशेषस्य संश्रयादालम्बनाद्धेतोर्लब्धात्मलाभाः प्राप्तसत्ताकाः । अत एव ज्ञस्य विदितवेद्यस्य योगिनः स्वरूपाव्यवधानादसम्पर्कात् सततं नित्यमपरिपन्थिनः स्युः । स्वभावाच्छादका न भवन्तीत्यर्थः । सिद्धोक्तं च–

'यद्वत्प्र[1]काशभवने प्रकाश्यविषयो न दृश्यते मातः ।
संपर्कात्तव तद्वत्संविद्वेद्यो न भाव्यते जातु' ॥

इति । ते चास्यैव स्पन्द इति प्रागेवोक्तम् । मतङ्गपारमेश्वरेऽपि–

'शिवाद्यवनिपर्यन्तो योयमध्वाऽतिविस्तरः ।
स समस्तश्चिता ज्ञेयस्तया संवेद्यते यतः' ॥

इति । गीतासु च–

'दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते माया[2]मतितरन्ति ते' ॥

(भ. गी. ७–१४)

इति ॥ १९ ॥

अज्ञस्य तु–

अप्रबुद्धधियस्त्वेते स्वस्थितिस्थगनोद्यताः ।
पातयन्ति दुरुत्तारे घोरे संसारवर्त्मनि ॥ २० ॥

इति । अप्रबुद्धा सम्मूढाधीर्बुद्धिर्यस्य पुंसस्तस्य पुनरेते गुणादिस्पन्दनिष्यन्दाः स्वस्थितेश्चिद्रूपाया अवस्थायाः स्थगने ऽवच्छादने प्रोद्यताः । यतोऽसौ तदात्मकमेव नित्यमात्मानं पश्यति । न शुद्धबुद्धरूपतया । उक्तं च–

---

१. Both the manuscripts are mistaken here. A. omits 6 letters after यद्वत्° and also the word मातः. B. also omits 3 letters after प्रकाश°. २. The text of Gitâ reads मायामेतां तरन्ति ते.

'यथाऽऽदर्शे शिशुः स्वच्छं निश्वासैः स्वैर्मलीमसम् ।
करोति तद्वद्विज्ञानं स्वविकल्पैर्जडाशयः' ॥

इति । अत एव संसारवर्त्मनि पातयन्ति जनन-मरणप्रवाहमार्गे प्रेरयन्ति । कीदृशे? दुरुत्तारे दुःखेनोत्तरणं निस्तारो यत्र । अत एव घोरे क्लेशप्रदे । तदुक्तं ज्ञानसम्बोधे—

'यद्यपि स्वात्मशक्त्यैव गतिः साध्वन्ययोर्द्वयोः ।
तथाप्येकः स्वयं याति द्वितीयोऽन्येन नीयते ॥
साक्षिवत् स्फीतबोधानां स्वातन्त्र्यं विषमेष्वपि ।
अन्धवन्मन्दबुद्धीनां पारतन्त्र्यं समेष्वपि' ॥

इति ॥ २० ॥

अथात्राऽज्ञस्याप्युत्तरणोपायमाह—

**अतः सततमुद्युक्तः स्पन्दतत्वविविक्तये ।
जाग्रदेव निजं भावमचिरेणाधिगच्छति ॥ २१ ॥**

इति । यतस्ते पातनशीलाः[1] अतोऽस्मात्कारणाद्यः सततं सर्वकालमुद्युक्तो विकस्वरस्वभावतया कृतोद्योगः । किमर्थं? स्पन्दतत्वस्य विविक्तये विवेचनाय स्वरूपाभिव्यक्त्यर्थम् । यत उद्योक्तृरूपं तत् । उक्तं च शिवसूत्रेषु—

'उद्योगः शिवः' ।

इति । अतः प्र[2]जाग्रदेव जाग्रदवस्थायामेव व्युत्थानेऽपि निजमात्मीयं स्वभावमचिरेण शीघ्रमधिगच्छति प्राप्नोति । अस्य चैतद्विवेचनम् । यदहं शुद्धबोधैकरूपो जगच्चेदं मत्स्फार एव । उक्तं च—

'सर्वो ममाऽयं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रसरेऽपि महेशता' ॥

इति । पञ्चरात्रेऽपि—

'यदात्मनि सर्वभूतानि पश्यत्यात्मानं च तेषु पृथक्च
तेभ्यस्तदा मृत्योर्मुच्यते जन्मनश्च' ।

इति । अन्यत्र च—

---

१. A. reads यातना°. २. A. substitutes त्व° for प्र°.

'निर्मलानन्त्यबोधैकरूपस्त्वं भव्यबुद्धिभिः ।
वेद्याद्वा वेदकाद्वाऽपि लभ्यसे[1]ऽवहितात्मभिः' ॥

इति । तत्वार्थचिन्तामणौ च—

'इत्थं तत्तदनल्पमोहदर्[2]लनप्राप्तस्वरूपोदयो
योगी नित्यमनात्मभावविरहात्स्वात्मस्थितौ निर्वृतः ।
दृश्य-द्रष्टृविवेकविद्रवपदव्यापी विमुक्तामयो
व्युत्थानेऽपि समाधिभाग्भवति सन्मोक्षश्रियः कारणम्' ॥

इति ॥ २१ ॥

जाग्रदेव स्वभावोक्तिर्योक्ता सा ऽत्रैर्न लक्ष्यते ।
अतः स्पन्दोदयपदान्युच्यन्ते येषु लक्ष्यते— ॥

अतिक्रुद्धः प्रहृष्टो वा किंकरोमीति वा मृशन् ।
धावंन्वा[3] यत् पदं गच्छेत्तत्र स्पन्दः प्रतिष्ठितः ॥ २२ ॥

इति । द्विषोद्दीपितामर्षोऽतिक्रुद्धः सन्प्राग्यत्पदं गच्छेत् यं ह स्फारमालम्बते यस्मिन्मुख्यवृत्तिं स्पृशेत् । अथवा सुचिरागतप्रियदर्शनादिना प्रहृष्टः प्रहर्षितो यत् पदं गच्छेत्परानन्दरूपं गृह्णीयात् । तथा अनेककार्यकल्लोलाकुलतया किं करोमि ? इदं करोमि, अथवेदं करोमीति मृशन् परामृशंश्चिन्ताविष्टो यत् पदं गच्छेन्निश्चयकारिणीं दशामाश्रयेत् । तथा कान्ताहृतचित्ततया संभ्रमाद्वा धावन्धावमानो यत् पदं गच्छेद्यामवस्थामारोहति तत्र तस्मिन्पदे स्पन्दः प्रागुक्त आत्मस्वभावः प्रतिष्ठितः स्फुटोपलभ्यतया स्थितः । एतदुक्तं भवति—

'यत्र यत्र यदा येन सर्वशक्तिलयो भवेत् ।
स्फुटः स्यात् स्पन्दतत्वस्य तत्र तत्र तदोदयः' ॥

इति । यतः—

'क्रोधाद्दुःखभुवः सर्वा हर्षात् सुखभुवः स्मृताः ।
किंकरोमीति मोहोत्था धावन्तीन्द्रियवृत्तयः' ॥

इति । उक्तं च विज्ञानभैरवे—

---

१ A. reads लम्भसे. for लभ्यसे २. A. reads °दहन°. ३. A. reads धावत्पदं for वा यत् पदं.

'क्रोधाद्यन्ते भये शोके गह्वरे वारणे रणे ।
कुतूहले क्षुदाद्यन्ते ब्रह्मसत्ता समीपगा' ॥

इति । रहस्यस्तोत्रे च–

'क्रोध-हर्षविवशः परां दशामाश्रितोऽ[१]थ विमृशंश्च यः क्रियाम् ।
यत् स्पृशत्यनियतक्रियास्पदं स्पन्दमात्मबलदं वदन्ति ते ॥
एषोऽन्यच्च त्रुटेः पातः प्रोक्तः सर्वज्ञतादिभाक्' ।

इति । त्रुटिपाते सर्वज्ञत्व-सर्वकर्तृत्व-सर्वेशतादयः । एष च गुरूपदेशेनादरात् परीक्ष्यः ॥ २२ ॥

अस्यैवोदयायोपायान्तरं विशेषकेनाह–

यामवस्थां समालम्ब्य यदाऽयं मम वक्ष्यति ।
तदवश्यं करिष्येऽहमिति सङ्कल्प्य तिष्ठति ॥ २३ ॥
तामाश्रित्योर्ध्वमार्गेण सोम-सूर्यावुभावपि ।
सौषुम्णेऽध्वन्यस्तमितो हित्वा ब्रह्माण्डगोचरम् ॥ २४ ॥
तदा तस्मिन् महाव्योम्नि प्रलीनशशि-भास्करे ।
सौषुप्तपदवन्मूढः प्रबुद्धः स्यादनावृतः ॥ २५ ॥

इति । अयमेष देवदत्तो ज्ञाता अद्भुतसद्भूस्त्वभिधाय्यनुलङ्घ्याज्ञो यत्किंचिन्मम वक्ष्यति वदिष्यति तदवश्यमहं करिष्येऽनुष्ठास्यामि करिष्यामीति सङ्कल्प्य यामवस्थामौन्मुख्यरूपां वृत्तिं समालम्ब्य गृहीत्वा यस्तिष्ठति तस्य पुंसस्तामवस्थामाश्रित्योर्ध्वमार्गेण विषुवत्प्रवाहेण सोम-सूर्यावुभावपि द्वावप्यपान-प्राणौ । मनः-प्राणौ वा । सौषुम्णेऽध्वनि मध्यमनाड्यां परशक्तिमार्गे स्वयमस्तमितो लयं गच्छतः । किमस्य हृद्गतं स्यादिति कुतूहलात् । किं कृत्वा भवतः ? ब्रह्माण्डगोचरं हित्वा शरीरविषयं विहाय देहाऽहम्भावं त्यक्त्वेत्यर्थः । उक्तं च–

'जाते देहप्रत्ययद्वीपभङ्गे प्राप्तैकत्वे निर्मले बोधसिन्धौ ।
अध्यावर्त्यैवेन्द्रियग्राममन्तर्विश्वात्मा त्वं नित्यमेकोऽवभासि' ॥

इति । तदा तस्मिन्काले तस्मिन्महाव्योम्नि च परचिदाकाशे प्रत्यस्त-

१. B. reads °यो° for °तो° ।

मितशशि-भास्करे प्रशान्तज्ञान-क्रिये गूढो ऽनभिव्यक्तस्वस्वभावः स्वप्नादिना-ऽमुह्यमानः प्रबुद्धो ऽनिरुद्धः स्यात्सौषुप्तपदवत् । यथा सुषुप्तपदे तथा प्रबुद्ध-स्त्वनावृत एव भवेत् । उक्तं च रहस्यस्तोत्रे—

'स्वात्मनि स्तिमितसोम-भास्करं व्योममार्गमतिवर्त्य तस्थुषः ।
भावनाऽजितदृशोऽपि खेचराः केचिदेव तव धामदर्शिनः' ॥

इति । प्राणापानप्रशान्तिरेव चान्यत्र निरञ्जनतत्त्वोदये युक्तिः प्रोक्ता । मयाप्युक्तं भोगमोक्षप्रदीपिकायाम्—

'कामाख्ये विषतत्त्वे निरञ्जनाह्वे क्रमाच्च सिद्धिः स्यात् ।
सूर्ये सोमे ह्युदयात्तयोः शमाच्चेति शास्त्रसर्वस्वम्' ॥

इति । एवं स्पन्दतत्त्वस्योदयः प्रोक्तः । तदाऽस्मादेव च सहजो मन्त्रोदयः । उक्तं च बौद्धायन[1]संहितायाम्—

'शान्ते चन्द्रे त्वमाचाख्ये यावन्नोच्चरते रविः ।
उदयः सर्वमन्त्राणां विलयश्च दिवौकसाम्[2]' ॥

इति । मालिनीविजयेऽपि—

'यत्राऽऽधारविनिर्मुक्तो जीवो लयमवाप्स्यति ।
तत् स्थानं सर्वमन्त्राणामुत्पत्तिक्षेत्रमिष्यते' ॥

इति । तथा—

'धर्माधर्मान्तरे चित्तं निरुद्धं यत्[3]तदा तु सः ।
यद्वक्ति स भवेन्मन्त्रः किं पुनर्मातृकोत्थितः' ॥

इति ॥ २३—२४—२५ ॥

अत एव—

तदाक्रम्य बलं मन्त्राः सर्वज्ञबलशालिनः ।
प्रवर्तन्तेऽधिकाराय करणानीव देहिनः ॥ २६ ॥

इति । तद्बलं निरावरणचिदुल्लासरूपं परशक्त्याख्यमाक्रम्याधिष्ठाय मन्त्राः बीज-पिण्ड-पद-नामरूपाः मनन-त्राणधर्मिणः सहजनादशक्त्युद्बोधदीप्तत्वात् सर्वज्ञत्वादिना बलेन श्लाघायुक्ता मन्त्रिप्रयुक्ता अधिकारायानुग्रहादौ प्रव-

१. Here both manuscripts read बौधायन°, but I think possibly it may be बौद्धायन°. २. B. reads दिवौकसः. ३. B. reads यस्य for यत्.

र्तन्ते । किमिव? यथा शरीरिण: कर-चरणादीनि करणानि । अनेन मन्त्रिण: परत्वावबोधान्मन्त्रिष्विच्छामात्रेण यथेष्टविनियोज्यत्वमुक्तम् । तदुक्तं त्रिकसारे—

'विदिते तु परे तत्वे वर्णातीते ह्यविग्रहे ।
किङ्करत्वं तु गच्छन्ति मन्त्रा मन्त्राधिपै: सह' ॥

इति । अन्यथा तु प्रयत्नप्रयुक्ता अपि ते पूर्वोक्तसङ्कल्पत्वाद्यास्पदचिच्छक्तिबलास्पर्शात् केवलवर्णरूप-मात्रारूपत्वाद्यन्त्रपुत्रिकाकरणवन्निष्फलचेष्टा भवन्ति । उक्तं च हंसपारमेश्वरे—

'पशुभावे स्थिता मन्त्रा: केवला वर्णरूपिण: ।
सौषुम्णेऽध्वन्युच्चरिता: पतित्वं प्राप्नुवन्ति ते' ॥

इति । य उ एष शाक्तो मार्गोऽत्र च मन्त्राणां साफल्यम् । तदुक्तं तत्वरत्नविधाने—

'अशक्तत्वान्निष्क्रियत्वान्न पुंसि न परे पदे ।
शक्तौ नियोजयेन्मन्त्रं जपस्तु सफलो भवेत्' ॥

इति । श्रीवैहायस्यां च—

'विषुवत्कं जपं कुर्यान्नादोर्ध्वध्वनिबोधितम् ।
मन्त्राक्षराणि मणिवच्छक्तौ प्रोतानि भावयेत् ॥
तामेव च परे व्योम्नि परमामृतबृंहिताम् ।
दर्शयत्यात्मसद्भावमेवं मन्त्रो हुतिंविना' ॥

इति । श्रीकालपरायाम्—

'शब्दो नादात्मकस्तस्मात् प्रत्ययेनोपबृंहित: ।
मन्त्रबोधस्वरूपस्थमभिन्नो बोधयत्यपि' ॥

इति । अन्यच्च सङ्कर्षणसूत्रेषु—

'स्वात्मैकनिष्ठं चिद्रूपं भावाभावपरिष्कृतम् ।
स्वसंवेदनसंवेद्यं प्रकृत्यातीतगोचरम् ॥
इयं योनि: स्मृता विप्र मन्त्राणां प्रत्ययात्मिका ।
ते मन्त्रा वर्णरूपेण सबाह्याभ्यन्तरोदिता: ॥

१. A. reads मन्त्रधियै:

३

नैष्कालक्रिपदावस्थाः करणानीव देहिनाम् ।
प्रयुक्ताः सर्वकालेषु सिद्ध्यन्ते वीर्ययोगतः' ॥

इति । एवं शुद्धबोधात्मकत्वेनान्तर्बाह्योदयादेकोऽपि जपो लक्षसङ्ख्याकः । तदुक्तं जयायाम्—

'एकस्य मन्त्रनाथस्याप्यन्तर्बाह्योदितस्य च ।
यदैक्यं तं जपं विद्धि लक्षसङ्ख्याधिकं मुने' ॥

इति ॥ २६ ॥

अनेन युक्त्या मन्त्रवीर्यमुक्तं, प्राक्स्वोदयोऽधुनास्तमयमाह—

तत्रैव सम्प्रलीयन्ते शान्तरूपा निरञ्जनाः ।
सह साधकचित्तेन तेनैते शिवधर्मिणः ॥ २७ ॥

इति । तत्रैव स्वस्वभावे शक्तिमति । एते मन्त्राः साधकचित्तेन तत्प्रवृत्तिनिमित्तेन तदाधारभूतयेच्छया सह सम्यक् प्रलीयन्ते अस्तं गच्छन्ति । यतस्ते तदनुगास्तच्छक्तिरूपाश्च । उक्तं च कालपरायाम्—

'पराक्षरतरोर्धातुर्नानाशक्तेर्विवर्तगाः ।
शक्तयो वर्णदेहेषु वक्राद्वर्णत्वमागताः' ॥

इति । किंभूताः ? कृतकृत्यत्वाच्छान्तरूपाः । अत एव निरञ्जनाः महाकालुष्यरहिताः । निरञ्जनतत्त्वानुप्राणनाद्वा । अनेनैव च हेतुना शिवधर्मिणः शिवस्येव धर्मा गुणा येषाम् । सर्वज्ञाः सर्वकर्तार इत्यर्थः ॥ २७ ॥

सहसाधकचित्तेन लीयन्ते तत्र यत् स्मृतम् ।
शिवतात्मनि सर्वात्स्यात् चाहैतत्सोपपत्तिकम्—॥

यस्मात्सर्वमयो जीवः सर्वभावसमुद्भवः ।
तत्संवेदनरूपेण तादात्म्यप्रतिपत्तितः ॥ २८ ॥
तेन शब्दार्थचिन्तासु न साऽवस्था न यः शिवः ।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः ॥ २९ ॥

(सन्दानितकम् ।)

१. B. reads लक्ष्य°. २. B. reads °भिधं.

इति । यस्माज्जीव आत्मैव सर्वमयः सर्वात्मको विश्वरूपः । बोद्धृरूपत्वात् । उक्तं च–

'यदैव विदितं विश्वं तदानीमेव चिन्मयम् ।
यन्नास्ति भागो वेद्योऽसौ नाथ यो वेदकाद्बहिः ॥
वेद्यो वेदकतामाप्तो वेदकः संविदात्मताम् ।
संवित् त्वदात्मा चेत् सत्यं तदिदं त्वन्मयं जगत्' ॥

इति । श्रुतिश्च–

'आत्मैवेदं जगत् सर्वं नेह नानास्ति किंच न' ।

(छां॰ उ॰ ३॰ ९॰ १२)

इति । अन्यच्च । सर्वभावसमुद्भव इति विशेषणं हेतुगर्भम् । हेतुर्वाऽयं समुद्भवादिति सर्वेषां भावानां समुद्भवो यस्मात् । परादिवाग्रूपतया संविदुपारोहेण हि तेषामुदयः सत्ता च । तदुक्तम्–

'त्वत्कारणत्वं सर्वस्मिन्नपि ज्ञातं त्वदन्वयात् ।
संवित्समन्विते विश्वे नाऽसंवित् कारणं भवेत् ॥
संविदायतनं ज्ञातं तत् सदाख्यां प्रपद्यते ।
तावतैव न लभ्या स्यादनुपासितसंविदा' ॥

इति । अन्यच्च–

'त्वदात्मकत्वं भावानां विवदन्ते न केच न ।
यत्प्रकाश्यदशां याता नाऽप्रकाशः प्रकाशते' ॥

इति । तथा–

'सृजन्वदन् ज्ञापयंश्च विधैकस्त्वं प्रकाशकः ।
व्यतिरिक्तः प्रकाश्येभ्यो[१] न यथाऽन्ये प्रकाशकाः ॥
न प्रकाशाः प्रकाशन्ते त्वत्प्रकाशोदयंविना' ।

इति । पञ्चरात्रेऽपि–

'न तत्रादित्यो भाति' ।

इत्यादि यावत्–

---

१. B. reads प्रकाशेभ्यः.

'तस्य भासा सर्वमिदं विभाति' ।

इति । सर्वमयत्वेऽस्य हेत्वन्तरमाह– तत्संवेदन इत्यादि । तदिति भावानां संवेद्यानां परामर्शः । तेषां संवेदनरूपेणानुभवद्वारेण यतस्तादात्म्यप्रतिपत्तिर्भावरूपतासम्प्राप्तिस्तदभेदसंवित्तिस्ततो हेतोः । उक्तं हि स्वात्मसप्ततौ–

'यद्यद्वस्तु स्वभावेन ज्ञानेन विषयीकृतम् ।
तद्वत्तादात्म्यमायाति जीवः सर्वमयो ह्यतः' ॥

इति । अन्यत् संवित्प्रकरणे–

'यथाऽग्निना समाविष्टं सर्वं तद्रूपमीक्ष्यते ।
तथा ज्ञानसमाविष्टं सर्वं तद्रूपमीक्ष्यताम्' ॥

इति । तथाऽऽगमरहस्ये–

'आकारवर्गउपरिप्रतिभासतेऽस्य
ज्ञानस्य सापि तव विश्वमयी विभूतिः ।
विश्वात्मकस्त्वमिति नाऽऽगमसिद्धमेतत्
किं तु स्वसंविदितरूपतयाऽपि सिद्धम्' ॥

इति । एवं संविदेव प्राणद्वारेण वाग्रूपतां धत्ते । तदुक्तम्–

'स्थानेषु विवृते वायौ कृतवर्णपरिग्रहा ।
वैखरी वाक् प्रयोक्तॄणां प्राणवृत्तिनिबन्धना ॥
केवलं बुद्ध्युपादानात्क्रमरूपानुपातिनी ।
प्राणवृत्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते ॥
अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सूक्ष्मावागनपायिनी' ॥

इति । तथा–

'स्वयं रौति य एषोन्तर्निर्विशेषनवात्मकः ।
स परः परमः स्थायी नित्योदितनिजाकृतिः ॥

---

१. B. reads तत्तत्ता.° २. A. and B. insert one line more thus:—
तथा ज्ञानसमाविष्टं सर्वं तद्रूपमीक्ष्यते ।
but I do not ee its necessity here.

चिदिच्छाशक्तिसम्बुद्धः स्पन्द आत्मबलेरितः ।
सवितेव स तेजांसि विचिन्वन्हृदि राजते' ॥

इति । प्रत्यभिज्ञायां च—

'चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥
सा स्फुरत्ता महासत्ता देश-कालाविशेषिणी ।
सैषा॒ऽऽधारतया प्रोक्ता हृदयं परमेष्ठिनः' ॥

इति । तस्यां चान्तःसंजल्परूपायां द्वावपि शब्दार्थौ समं स्फुरतः । अत एव तयोरभेद एव विख्यातः । उक्तं चेह—

'यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः' ।

इति । वाक्च संविन्मूलेति प्रागेवोक्तम् । 'संविन्मूलात्'—इत्यादि । तथाजातीयैः श्लोकैरन्यच्चोक्तम्—

'यथा तया जगद्विद्धं सर्वमेव निजात्मना ।
तथा तयाऽनुविद्धेयं सर्वतो भाति भारती' ॥

इति । योगिनाथेन चोक्तम्—

'तस्मात्सर्वस्य सिद्ध्यर्थं भारती कारणं परे ।
परेष्ट्व्या तदा रूपान्वेषणेनार्थनिश्चयात् ॥
तस्या औन्मुख्यवृत्त्यैव सद्भावपरिकल्पनात् ।
न हि तामन्तरेणैषा लभेताऽऽत्मानमम्बिके ॥
सा च तस्यामवस्थायां स्वरूपज्योतिरिष्यते ।
निर्विभागक्रमापेक्षा योगिगम्यानुरूपिणी ॥
तत औन्मुख्यतश्चिन्तामयी भवति वाक् शिवे ।
विशिष्टशब्दविषयविवक्षास्फुरणात्मिका ॥
ततः शब्दात्मकत्वेन विवृत्तार्थमयी भवेत् ।
तदात्मतामन्तरेण यस्मान्नार्थावधारणम्' ॥

---

१. I am unable to find out the original reading here. A. reads सैवाक्षरतया and in B. the third letter in this line is quite illegible, it can be read सा or —
२. A. reads स्वयं. ३. A. reads °भेदेन. ४. B. reads °रूपणेन.

इति । एवं संवित्स्वरूपस्य सर्वप्रकाशकस्य प्रभेव प्रकाशनशक्तिर्या वागन्तःसञ्जल्परूपा वर्ण-पद-वाक्याजीवभूता सैव पदार्थरूपतया बहिर्भवतीति स्वानुभवप्रसिद्धमेव प्रबुद्धानाम् । उक्तं च—

'चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः ।
योगीव निरुपादानमर्थजातं प्रकाशयेत् ॥
स्वामिनश्चात्मसंस्थस्य भावजातस्य भासनम् ।
अस्त्येव न विना तस्मादिच्छामर्षः प्रवर्तते' ॥

इति । अन्यच्चोक्तम्—

'यत्किंचिद्वाभाति बहिस्तदीश नूनं तवास्त्येव समस्तमन्तः ।
निमीलिताक्षा हृदि लक्षयेयुस्तथैव सर्वं कथमन्यथा तत्' ॥

इति । इत्थं स्वभाव एव यतः सर्वात्मस्थेन तथाविधेन सर्वात्मकेन स्वभावेन हेतुना शब्दार्थयोश्चिन्तासु मध्याविषये वा न सा काचिदवस्थास्ति या न शिवस्वभावमभिव्यञ्जयति या न चित्स्वरूपेत्यर्थः । संवित्स्वीकरणैक्यात् । यतः सर्वस्यास्तित्वम् । तदुक्तम्—

'येन येन विभिद्यन्ते हेतुना भावनिम्नगाः ।
तेन तेनैक्यमायान्ति बोधोदधिसमागताः' ॥

इति । प्रागुक्तं च—

'शरीरजो वा शाब्दो वा मानसो वा समुद्गतः ।
व्यवहारोऽप्यसौ नास्ति यत्र त्वं नाथ नाग्रगः' ॥

इति । अतश्च भोक्तैवानुभवितैव भोग्यभावेनानुभाव्यतया सदा सर्वत्र संस्थितो न त्वन्यद्भोग्यमस्ति । तथा च श्रुतिः—

'[१]अहमन्नमहमन्नमहमन्नम् ।
अहमन्नादोऽहमन्नादोऽहमन्नादः' ॥

(तै॰ उ॰ ३–१०–)

इति । ग्रन्थकृता तत्वविचारेऽप्युक्तम्—

१. Both manuscripts read अहमत्रमहमत्रादोहमत्रद इति; while A. prefers °मत्राद for °मत्रद. I correct this quotation from the text of Taittirîyopanishad.

'स्वस्वभावस्थिता भावाः सम्बध्यन्ते[1] परस्परम् ।
भोग्य-भोक्तृत्वभावेन न कदाचित्स्वभावतः ॥
द्रष्टाऽनुभविता स्मर्ता ग्राहको भोक्तृवेदकः[2] ।
कर्तोपलब्धा संवेत्ता ज्ञातेति ज्ञानसंज्ञकाः' ॥

इति । तेन ज्ञानमेव ज्ञेयरूपतया प्रथते इत्यर्थः । उक्तं च—

'भोक्तुर्विभोगैर्भवतो विभिन्नः स दृश्यते मुग्धतया स्व आत्मा ।
ते भोग्यभूताः पशुवत्परेषां भोगाय भूयोऽत्र भवे भ्रमन्ति ॥
भवं भवद्भिभवभूतमेव विभावयन्तो भगवन्भवेयुः ।
भवद्वदेव प्रभुभावभाजो विश्वं वशे वर्तयितुं समर्थाः' ॥

इति । ज्ञानसम्बोधेऽपि—

'ज्ञाता ज्ञेयं ज्ञानमिति ज्ञानस्यैव त्रिधा स्थितिः ।
ब्रह्मार्पणं ब्रह्महविरित्यत्रोक्तं तदेव यत्' ॥

इति । मयैव चोक्तं क्वाऽपि—

'द्रष्टैवाऽस्ति न दृश्यमेतदबुधैरध्यात्मना ज्ञायते
आदर्श-प्रतिबिम्बवज्जगदिदं भिन्नं द्विधा भाति यत् ।
सत्तां यान्ति घटादयो बहिरमी बोधानुवेधात् सदा
ज्ञानाद्वैतमतः स्वतोऽस्ति न पुनर्ज्ञेयस्य सत्ता क्वचित्' ॥

इति । तथात्मसप्ततौ—

'यदिदं दृश्यते किंचिद्दर्शनात्तन्न भिद्यते ।
दर्शनं द्रष्टृतो नान्यद्द्रष्टैव हि ततो जगत्' ॥

इति । सङ्कर्षणसूत्रेष्वपि—

'येनेदं दृश्यते विश्वं द्रष्टा सर्वस्य यः सदा ।
दृश्यश्चराचरत्वे यः स विष्णुरिति गीयते' ॥

इति । जाबालिसूत्रेष्वपि—

'द्रष्टा स्प्रष्टा श्रोता घ्राता रसयिता मन्ता बोद्धा ऽपरिलुप्तचैतन्य-स्वभावो जगदुत्पत्ति-स्थिति-लयैकहेतुर्भगवान्वासुदेव आत्मेति'।

इति । पञ्चरात्रोपनिषदि च—

---

१. A. reads सम्पद्यन्ते. २. A. reads °भेदकः.

'ज्ञाता च ज्ञेयं च वक्ता च वाच्यं च भोक्ता च भोग्यं च' ।

इत्यादि । तथा ऽत्रैव–

'सर्वान्तरं सर्वबाह्यं स्वयंज्योतिः स्वयंसम्बोद्धुं स्वयम्भूरिति च'

इति । श्रुतिरपि–

'स एव ज्ञाता तज्ज्ञानमिति' ।

इति । एवमेष एव मन्त्रात्मा । तेषां चात एव शिवधर्मित्वं सिद्धमिति ॥२८–२९॥

अत्रैव प्रसंगाद्द्वारेण स्वीकरणोपायं प्राह–

इति वा यस्य संवित्तिः क्रीडात्वेनाखिलं जगत् ।
स पश्यन्सर्वतो युक्तो जीवन्मुक्तो न संशयः ॥ ३० ॥

इति । वा शब्दः स्वार्थे ऽत्र । किं बहुना इत्येव चोक्तप्रकाररूपा यस्य संवित्तिः संवेदनं ज्ञानम् । यथा मन्मयमेव सर्वम् । सोऽखिलं समग्रं जगत् क्रीडारामतया पश्यन्विभावयन्नित्ययुक्तत्वाच्च बन्धकारणस्याज्ञानस्य क्षयात् प्रबोधाप्तेः जीवन्नेवेश्वरवन्मुक्तो नाऽत्र संशयः ।

'उपपत्त्युपलब्धिभ्यां सिद्धत्वाद् भ्रान्तिरत्र नो' ।

इति । उक्तं च–

'सम्यक्स्वबोधविश्रान्तो योऽलुप्तानुभवः स्थितः ।
विषयानपि सो[1]ऽश्नन्स्याज्जीवन्मुक्तस्तु तत्ववित्' ॥

इति । ये त्वाहुः–

'विनोत्क्रान्तिं कुतो मोक्षः?' ।

इति तन्निरासायाऽऽह–

'वि[2]ना स्वभावानुभवेन पुंसःकैवल्यमुत्क्रान्तिबलाद्यदि स्यात् ।
अत्राऽपि पक्षे ननु मोक्षभाक्स्व उद्बन्धनं यः कुरुते प्रमूढः' ॥

इति । तथा–

'विदेहा अपि बद्ध्यन्ते प्रलये गुणवासिताः ।
शरीरिणोऽपि मुच्यन्ते विशुद्धज्ञानसंश्रयात्' ॥

---

१. A substitutes यो° for सो°. २. I am unable to ascertain whether these two lines are from the text itself or are quotations from another work. They are not found in the Spandakârikâ-vivaraṇam of Râjânaka-Śrîrâma.

इति । ज्ञानगर्भेऽपि—

'मयि स्थितमिदं जगत् सकलमेव सर्वत्र वा
स्थितोऽहमितिधारणाद्द्वितयभावनावेशतः ।
जगत्त्रितयनाथ तानतिचिरेण सम्प्राप्यते
नृभिस्तव सपर्यया दलितकिल्बिषोपप्लवैः' ॥

इति । गीतास्वपि—

'यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याऽहं न प्रणश्यामि स च मे न प्रणश्यति' ॥

(भ॰ गी॰ ६–३०)

इति । पञ्चरात्रेऽपि—

'प्रज्ञाप्रासादमारुह्य अशोच्यः शोचतो[1] जनान् ।
भूमिष्ठानिव शैलस्थः सर्वान्प्राज्ञो ऽनुपश्यति' ॥

इति । अत्र च नित्योद्युक्तरूपत्वमेवोपायो युक्त्या ध्वनितः प्राक्चोक्तं हि 'अतः सततमुद्युक्तः' इत्यादि ॥ ३० ॥

अथ प्रागुक्तस्य मन्त्रात्मनो युक्त्यन्तरोदयवर्णनद्वारेण निगमनं करोति—

अयमेवोदयस्तस्य ध्येयस्य ध्यायिचेतसि ।
तदात्मतासमापत्तिमिच्छतः साधकस्य वा ॥ ३१ ॥

इति । अयमेव तस्य पूर्वोक्तस्य ध्येयस्य मन्त्रात्मनो ध्यायिचेतस्युदयः । समापत्तिमेकीभावं मन्त्रात्मतापत्तिमिच्छतो गृह्णतः साधकस्य ध्यायिनो वा तदात्मतया ध्येयस्वरूपापत्तिरित्यर्थः । उक्तं हि विश्वसंहितायाम्—

'ध्येये चित्तं यदा लीनं तदा ध्यानमुदाहृतम् ।
ध्येयः प्रत्यक्षतां याति ध्याता तन्मयतां व्रजेत् ॥
ऋच्छतस्त्विति पाठाद्वा ध्येयं चिन्तयतोऽत्र या ।
तदात्मतासमापत्तिरैक्यं तस्योदयः स तु' ॥

---

१. B. reads शोचते.

इति । ग्रन्थकृतस्तु द्वयमप्याशयः सहते । यतो मन्त्रोच्चारणेच्छया मन्त्रदेवतया सह यत्तादात्म्यं योऽन्तः संवेदनद्वारेण तदात्मग्रहो मन्त्रन्यासात्मकः स एवास्योदय आविर्भाव इति ॥ ३१ ॥

अस्यैव व्याप्तिफलमाह—

इयमेवाऽमृतप्राप्तिरयमेवाऽऽत्मनो ग्रहः ।
इयं निर्वाणदीक्षा च शिवसद्भावदायिनी ॥ ३२ ॥

इति । उक्तं च—

येयं स्वरूपसंवित्तिः साऽमृताप्तिरिहात्मनः ।
जरा-मरणविच्छेदादपुनर्भवता न तु ॥
दुग्धाब्ध्युद्गतस्यायमेव चात्मनोऽनुग्रहः स्वतः ।
निर्वाणदीक्षा तच्चेयं परमात्मनियोजिका ॥

इति । उक्तं च मोक्षधर्मेषु—

'हित्वा तु सर्वसङ्कल्पान्सत्वे चित्तं निवेशयेत् ।
सत्वे चित्तं यदा लीनं ततः कालञ्जयो भवेत्' ॥

इति । आत्मसम्बोधे च—

'भवेद्भवानामभवाय नूनं स्वभावसंविद्विदितैव पुंसाम् ।
अमर्त्यतां मर्त्यजने करोति सकृत्सुधाप्राशनमात्रमेव' ॥

इति । दीक्षार्थोऽयम्—

'ददातिज्ञानसद्भावं क्षपयत्यखिलं मलम् ।
बोधानुवेधाद्दीक्षोक्ता दान-क्षपणधर्मिणी' ॥

इति ॥ ३२ ॥

स्पन्दतत्वोदयं प्रोच्याकृत्रिमं तत एव च ।
मन्त्रोदयं च तद्वीर्यं तद्विभूतीरथाऽऽह तु—॥

यथोक्तस्य जाग्रत्येव निजभावाप्त्या स्वातन्त्र्यं तथा स्वप्नेऽप्यस्तीति वक्तुमाह—

यथेच्छाभ्यर्थितो धाता जाग्रत्यर्थान्हृदि स्थितान् ।
सोम-सूर्योदयं कृत्वा सम्पादयति देहिनः ॥ ३३ ॥

तथा स्वप्नेऽप्यभीष्टार्थान्प्रणयस्यानतिक्रमात् ।
नित्यं स्फुटतरं मध्ये स्थितवद्यं प्रकाशयेत् ॥ ३४ ॥

(युगुलकम् ।)

इति । यथा जाग्रति जाग्रदवस्थायां धाता स्रष्टाऽऽत्मस्वभाव इच्छया दिदृक्षात्मिकयाऽभ्यर्थितो याचितः सन्देहिनः पुंसो हृदि स्थितानभिमतानर्था-न्पदार्थान्सम्पादयति प्रकाशयति स्वबलावष्टम्भात् । किं कृत्वा ? सोम-सूर्य-योरपान-प्राणयोश्चक्षुषोश्चोदयं कृत्वा चक्षुरादिष्ववधानेनेत्यर्थः । एतदुक्तं भवति—अनेकाऽर्थसन्निधानेऽपि गणिका नट-मल्ल-प्रेक्षकादिषुमध्याद्यदेव वस्त्व-भिमतं तदेव यथा पश्यति । स्वरूपानुप्रवेशात् । तथा स्वप्नेऽप्यभीष्टा-नेवार्थान्मध्ये हृदि स्वस्वभावे स्थितः सन्स्फुटतरं कृत्वा नित्यं सदैव प्रका-शयेद्दर्शयति । कुतः ? प्रणयस्येच्छाभ्यर्थनाया अनतिक्रमात् अत्यागात् ।

'मुक्त्वा दृढामभीप्सेच्छां नाऽन्यवृत्तिर्यदा भवेत्' ।

इति । एतदुक्तं यदीच्छातदनुगैव भवेन्न स्वातन्त्र्येण प्रभवति तदैत-त्स्यात् । तां चासौ नाप्यतिक्रामति । उक्तं च रहस्यस्तोत्रे—

'विस्मृतार्थमभियुज्यधीर्यथा त्वामशेषविदमाशु शंसति ।
यद्यदित्यमनयाऽर्थ्यते रसात् स्वप्नगोऽपि न विलङ्घयिष्यसि' ॥

इति । सिद्धोक्तं च—

'चिद्योम्निस्थोऽनुसन्धत्ते यत्तत्पश्यत्यखण्डितम्' ।

इति । ज्योतिःशास्त्रेऽपि—

'येन येनेन्द्रियार्थेन विद्धः स्वपिति मानवः ।
तस्य तस्येन्द्रियार्थस्य सुप्तः कर्माणि पश्यति' ॥

इति ॥ ३३—३४ ॥

एवं स्वप्नस्वातन्त्र्यवर्णनद्वारेण युक्त्या सौषुप्तमोवरणनिर्भेद उक्तः । अथ स्वरूपस्यस्यैव जाग्रत्स्वप्नादौ स्वातन्त्र्यं नत्वन्यथेत्यभिधातुमाह—

अन्यथा तु स्वतन्त्रा स्यात्सृष्टिस्तद्धर्मकत्वतः ।
सततं लौकिकस्येव जाग्रत्स्वप्नपदद्वये ॥ ३५ ॥

---

१. A. reads सदैव and B. reads सदेवं.

इति । अन्यथा पुनः स्वरूपस्थित्यभावे चित्तस्य चञ्चलत्वात्स्वप्नादौ सृष्टिरिच्छारूपा स्वतन्त्रा स्यात् । स्वप्नादिप्रसरो ऽसमञ्जसरूपो भवेदित्यर्थः । कुतः ? तद्धर्मकत्वात् सृष्टिस्वभावत्वात् । यतः तत्तत्वमिच्छाख्यप्रसवधर्मि नित्यम् । कस्येव ? यथा लौकिकस्याप्रबुद्धमतेर्जाग्रत्स्वप्नपदद्वये सततं सर्वकालं सृष्टिरिच्छैव स्वतन्त्रा । न त्वसौ ह्यप्रबुद्धतया । सा ऽस्य सहस्रशः सम्बद्धा-ऽसम्बद्धविकल्परूपैव भवेदवस्थाद्वितयेऽपीति यावत् ॥ ३५ ॥

एवमात्मनो विभूतिषु स्वातन्त्र्याख्यां युक्तिमुक्त्वा अथेदानीं ज्ञत्वकार्यसामर्थ्याख्या या तां कथयति । तत्र सूक्ष्म-व्यवहितादौ ज्ञत्वोपायं तावत्कारिकाद्वयेन प्राह—

यथा ह्यर्थोऽस्फुटो दृष्टः सावधाने ऽपि चेतसि ।
भूयः स्फुटतरो भाति स्वबलोद्योगभावितः ॥ ३६ ॥
तथा यत् परमार्थेन येन यत्र यदा स्थितम् ।
तत्तथा बलमाक्रम्य न चिरात्सम्प्रवर्तते ॥ ३७ ॥

इति । यथा दूरस्थितः कश्चिदर्थः पदार्थो घट-पटादिवस्तुविशेषोऽस्फुटः संदिग्धो दृष्टः सावधानेऽप्यन्यव्यावृत्तेऽप्येकाग्रेऽपि चेतसि सति हि यस्मात्स एवार्थो भूयः पुनः स्वबलोद्योगेनात्मबलप्रयत्नविशेषेण भावितो विचारितः सम्स्फुटतरो भाति निःसन्दिग्धः प्रकाशते ऽवभासते । तस्मात्तथा यद्वस्तु येन रूपेण यत्र यस्मिन्देशे यदा यस्मिन्काले स्थितं तद्वस्तु तथा तेनैव प्रकारेण प्रयत्नविशेषेण स्वबलं स्वस्वरूपं विकस्वरमाक्रम्याऽऽश्रित्याऽवष्टभ्य अभ्यासान्न चिरात्त्वरितं सम्प्रवर्त्तते सम्यक् प्रतिभाति । निरावरणस्वरूपत्वात् । प्रागुक्तं हि—

'अपि त्वात्मबलस्पर्शात्पुरुषस्तत्समो भवेत्' ।

इति । तत्वयुक्तौ च—

'विषयाधिपतिर्यो हि येन जानाति पार्वति ।
तस्य यो वेत्ति तत्वेन तेन ज्ञातं चराचरम्' ॥

इति । तेनाऽतीताऽनागतज्ञानं परिमितविषयं न किंचिदाश्चर्यम् ॥ ३६–३७ ॥

---

१. B. reads ज्ञानं.

एवं क्षत्वमुक्त्वाऽधुना कार्यकर्तृत्वसामर्थ्ये तज्जयाय चोपायान्तरमाह–

दुर्बलोऽपि तदाक्रम्य यतः कार्ये प्रवर्तते ।
आच्छादयेद्बुभुक्षां च तथा योऽति बुभुक्षितः ॥ ३८ ॥

इति । दुर्बलः क्षीणधातुः अशक्तः कृशोऽपि तद्बलमुत्साहलक्षणमुद्योगरूपमाक्रम्याऽधिष्ठाय स्वीकृत्य यतः कार्ये प्रवर्तते यस्माद्व्यापारं सम्पादयति । अतिकृशस्याप्युद्योगबलावलम्बनात्समरादौ शक्तिदर्शनात् । एतदुक्तं भवति–यथा कश्चिदसमर्थोऽपि व्यायामाभ्यासान्महतीं शक्तिं प्राप्नोति उद्योगबलेन । तथा योऽति बुभुक्षितः क्षुधार्तः सोऽपि तेनैव स्वस्वभावानुशीलनेन बुभुक्षां भोक्तुमिच्छामप्याच्छादयेत् क्षुधं शमयति । प्रोक्तं च पतञ्जलिना[2]–

'कण्ठकूपे क्षुत्पिपासानिवृत्तिः' ।

इति । तथा बलेषु हस्तिबलादीनि । बुभुक्षाशब्दोऽत्रोपलक्षणार्थम् । तेन क्षुत्तृषौ शोक-मोहौ जरा-मृत्यू चेति षडूर्मयोऽपि नश्यन्तीत्यर्थः ॥ ३८ ॥

एवं न केवलमस्मिन्नेव शरीरे तस्य सर्वज्ञतादयः[3] सन्ति यावत्सर्वत्रापीत्युपायद्वारेणाऽऽह–

अनेनाधिष्ठिते देहे यथा सर्वज्ञतादयः ।
तथा स्वात्मन्यधिष्ठानात्सर्वत्रैवं भविष्यति ॥ ३९ ॥

इति । अनेन प्रागुक्तेनात्मस्वभावेनाऽस्मिन्देहेऽधिष्ठिते प्राप्तेऽन्वीक्षिते सति यथा सर्वज्ञतादयो गुणा विद्यन्ते यस्मादत्र स्वल्पयूकादिभक्षणादपि क्षिप्रमेव जानाति । उक्तं च ज्ञानसम्बोधे–

'सर्वं स एव व्यापित्वात् ज्ञः स एव स्वभावतः ।
सर्वज्ञश्चेति सर्वज्ञः पुमानेव निरुच्यते' ॥

इति । अन्यच्च–

'सर्वज्ञः सर्वदैव त्वं सर्वस्य हृदये न चेत् ।
केनाऽन्यथास्य सम्भाव्या नष्टार्थविषया स्मृतिः ? ॥

---

१. A. reads °र्थोपभयाय. २. B. here and after substitutes पातंजलिना for पतञ्जलिना. ३. B. reads सर्वज्ञतदायस् for सर्वज्ञतादयः, but it seems to be incorrect.

तदहर्जातबालैश्च स्तनपानं क्व शिक्षितम्? ।
प्राणिभिर्वाप्सु तरणमेतत्सर्वज्ञचेष्टितम्' ॥

इति । अन्यच्च—

'भक्ष्यं स्यात्किमभक्ष्यं वा स्वाद्वस्वाद्विति निश्चये ।
मक्षिकाणां कुतः संवित् क्षौद्रसञ्चितिकर्मणि ॥
सर्वज्ञस्याप्यधिष्ठातुस्तद्विजृम्भितमन्यथा ।
कृमिमात्राल्पकायानां सम्भृतिर्विस्मयास्पदम् ॥
कतमस्य फलं वारि प्रसाधनविधित्सया ।
द्विपः क्षिपति, तस्यैषा प्रज्ञा ह्यज्ञस्य किं पशोः? ॥
गीताकर्णनवैदग्ध्यं मुग्धबुद्धेर्मृगस्य किम् ।
सम्भाव्यते, हि येनाऽस्य रोमन्थविरता स्थितिः ॥
भक्षयिष्यति मामित्यमाखोर्विवरवर्तिनः ।
मार्जारम्प्रति का शङ्का सर्वज्ञज्ञापनं विना ॥
भयात् कूर्मः स वार्यन्तः सर्वाण्यङ्गानि गूहते ।
दुर्भेदबुद्धिस्तत्रास्य विवेकविकलस्य किम् ॥
वीक्ष्यान्यक्षीणपक्षाणां वैलक्षण्यमचेतनः ।
नृत्तमारभते बर्हो स्फुरितं तज्जगद्गुरोः ॥
अगाधजलमध्यस्थमत्स्यभक्षणलक्षणम् ।
केनोपदिष्टं तन्मद्गोरनुमानविनाकृतम् ॥
अशक्यशक्तिः कस्येयं सलिलात्पिबतः[1] पयः ।
हंसस्य, न पुनस्तस्य हृदयान्तरवर्तिनः ॥
कृकवाकोर्गिरः कस्मात् क्षणज्ञव्यापिनं विना ।
यासामाकलनोद्युक्ता कालवित्कलना ततः— ।
प्रवर्तते दिनारम्भे निर्भ्रान्तकृतसंविधिः ॥
शृङ्ग-दन्त-नखादीनि प्राणिनामायुधानि यत् ।
परप्रहरणोद्रेके केनाऽऽख्यातान्यसंविदाम् ॥

१. B. reads °त्पिबतः.

बलं तेजः करी सिंहो जानाति निजमूर्जितम् ।
को हेतुर्यावदन्तस्थप्रतिपत्तिर्न सस्फुरा ॥
अतिवृष्टेरनावृष्टेर्व्यञ्जकं चिह्नमिङ्गितैः ।
सूचयन्ति न तच्चित्रं पशवः पक्षिणोऽपि यत् ॥
कृतान्तकल्पैः सिंहाद्यैः प्रीतिः प्राणभृतां कुतः ? ।
विनैकस्य हृदिस्थस्य संवित्संवादसुस्थितम् ' ॥

इति । तेषां च प्रागुक्तयुक्त्या विशेषाभिव्यक्तिः । तथा स्वात्मन्यधिष्ठानात्स्वरूपाऽच्यवनात् । एवं सर्वत्र सर्वज्ञ-सर्वतादयो भविष्यन्ति अभिव्यक्तिं यान्तीत्यर्थः । उक्तं च–

' एको भावः सर्वभावस्वभावः सर्वे भावा ह्येकभावस्वभावाः ।
एको भावस्तत्त्वतो येन दृष्टः सर्वे भावास्तत्त्वतस्तेन दृष्टाः ॥
रहस्ययुक्तिरत्रेयं शरीरे यत्र यत्र च ।
संविदो दार्ढ्यलाभः स्यात्तत्र तत्र गुणोदयः ' ॥

इति ॥ ३९ ॥

अथैषां गुणानामाच्छादकं मूलविच्छेदार्थमाह–

ग्लानिर्विलुण्ठिका देहे तस्याश्चाऽज्ञानतः सृतिः ।
तदुन्मेषविलुप्तं चेत् कुतः सा स्यादहेतुका ॥ ४० ॥

इति । ग्लानिर्हर्षक्षतिः अनुत्साहरूपा देहे किल विलुम्पिका विनाशिनी । तस्याश्चग्लानेरज्ञानतः सृतिः सरणमुत्पत्तिः । तच्चाऽज्ञानमुन्मेषेण वक्ष्यमाणलक्षणेनाऽऽत्मस्वभावेन यदा विलुप्तं निर्णोदितं नाशितं तदा कुतः सा ग्लानिरेव का स्यात्कारणरहिता भवेदित्यर्थः । अत एव च योगिनां जरारोगाद्यभावः शरीरदार्ढ्यं च भवेत् ॥ ४० ॥

अथोन्मेषस्य स्वरूपमाह–

एकचिन्ताप्रसक्तस्य यतः स्यादपरोदयः ।
उन्मेषः स तु विज्ञेयः स्वयं तमुपलक्षयेत् ॥ ४१ ॥

इति । एकस्यां चिन्तायां प्रसक्तस्यैकत्र विषये क्वचिद्व्यापृतचित्तस्य सतः यतो यस्मात्स्वस्वभावादपरस्याश्चिन्ताया उदयोऽभिव्यक्तिर्भवेत् । झटिति

यतोऽन्या चिन्तोत्पद्यते विस्मृतस्मरणादिका स चिन्तायाः कारणमुन्मेषो विज्ञेयः । तं च पुनरुन्मेषं स्वयमात्मनोपलक्षयेद्विजानीयात् । चिन्ताद्वय-मध्ये व्यापकत्वेनाऽनुभूयमानतया स्वसंवेद्यत्वाद्बृहत्कुमारीसुखवदनुपदेश्य इत्यर्थः ॥ ४१ ॥

अस्य चानुशील्यमानस्य प्रत्ययानाह—

अतो बिन्दुरतो नादो रूपमस्मादतो रसः ।
प्रवर्तते चिरेणैव क्षोभकत्वेन देहिनः ॥ ४२ ॥

इति । अतोऽस्मादुन्मेषादनुशील्यमानादचिरेणैव कालेन देहिनः पुंसि बिन्द्वादयः प्रवर्तन्ते उत्पद्यन्ते । बिन्दुस्तेजोरूपो भ्रूमध्यादौ । नादोऽकृत्रिमोऽनाहतात्मकः शब्दब्रह्माख्यो दूराच्छ्रवणं च । रूपमन्धकारे दर्शनं देवतानां च सूक्ष्मादिप्रदर्शनं च । रसो मुखेऽमृताऽऽस्वादः षड्रसानां च । कथमेते प्रवर्तन्ते उत्पद्यन्ते ? क्षोभकत्वेन उत्कृष्टसिद्धिविघ्नकारित्वेन । तथा च पतञ्जलिः—

'ततः प्रातिभश्रावण-वेदना-ऽदर्शना-ऽऽस्वाद-वार्ता जायन्ते ।
ते समाधावुपसर्गा व्युत्थाने सिद्धयः' ।

इति । अन्यच्च । अनेन युक्त्या सृष्ट्यादिक्रमो ध्वनितः । यतः प्रागुन्मेषात्सृष्टिरुक्ता । सा च कथम् ? अतोऽस्मादादौ बिन्दुरिच्छादृग्शक्तिप्रसररूपः । ततो नादः शब्दात्मको वागाख्यः क्रियाशक्तिरूपः । ततो रूपं पदार्थदर्शनविचारस्वरूपम् । ततस्तत्रैव रसोऽभिलाष उपभोगरूपश्चेति । एष एवातिरहस्यक्रमार्थविदामुद्योगावभास-चर्वण-विलापनरूपः क्रमचतुष्को क्रमोऽत्रैव युक्त्यैवोक्तः—

'न बाधते विशेषो हि प्रकृतं परिभाषया' ।

इति । तद्यदुक्तं 'स्वयं तमुपलक्षयेत्'—इति ॥ ४२ ॥

तत्कथमित्यत्रोपायमाह—

दिदृक्षयेव सर्वार्थान्यदा व्याप्यावतिष्ठते ।
तदा किं बहुनोक्तेन स्वयमेवावबोत्स्यते ॥ ४३ ॥

---

१. A. reads प्रापकत्वेन.

इति । द्रष्टुमिच्छा दिदृक्षा तया तदवस्थास्य इव सर्वार्थान्सर्वभावान् व्याप्याधिष्ठाय यदाऽवतिष्ठते वर्तते तदा । किं बहुनोक्तेनाधिककथनेन ? स्वयमेवात्मनैव तत्तत्स्वभावमवबोत्स्यतेऽवगम्यते ज्ञास्यतीत्यर्थः । अयमत्रोपदेशाशयः—यथा कुतूहलदिदृक्षुर्विकासवृत्त्यास्ते एवं यः सर्वभावोन्मुख्यरूपोद्यन्त्रितः स्वरूपे तिष्ठति स स्वभावं सर्वज्ञतादिगुणास्पदं स्वयमाप्नोति । यतः प्रागुक्तम्—'अतः सततमुद्युक्तः'—इत्यादि । या चैषा स्थितिः सैव तत्त्वार्थचिन्तामणौ रहस्यमुद्रेत्युक्ता । मयोक्तं भोग-मोक्षप्रदीपिकायाम्—

'उद्यन्त्रिता बलेन तु विकासवृत्त्या स्वरूपगस्तिष्ठेत् ।
स्वयमुपसृतेन्द्रियार्थानश्नन्नानन्दभूमिगो योगी ॥
एषोच्छृङ्खलरूपा विकस्वरतरा प्रबुद्धबुद्धीनाम् ।
सिद्धाः स्थिताः सदास्यां ह्यानन्दरताः परा च मुद्रैषा' ॥

इति । अन्यत्रोक्तं च—

'सर्वाः शक्तीश्चेतसा दर्शनाद्याः स्वेस्वे वेद्ये यौगपद्येन विष्वक् ।
क्षिप्त्वा मध्ये हाटकस्तम्भभूतस्तिष्ठन्विश्वाधार एकोऽवभासि' ॥

इति । तथा—

'स्वच्छन्दं या यत्र तत्र व्रजन्तीर्विश्वस्त्रीवच्चञ्चला या दृगाद्याः ।
शक्तीः पश्यन्, केवलं नानुगच्छेद्विश्वं बिभ्रद्भासि तस्य त्वमन्यः' ॥

इति ॥ ४३ ॥

अस्यामेव स्थितौ युक्तिमाह—

प्रबुद्धः सर्वदा तिष्ठेज्ज्ञानेनालोक्य गोचरम् ।
एकत्राऽऽरोपयेत् सर्वं ततोऽन्येन न पीड्यते ॥ ४४ ॥

इति । प्रबुद्धोऽसङ्कुचितशक्तिर्निर्विकल्प उद्योक्तरूपतया सर्वकालं तिष्ठेत् वर्तेत । ज्ञानगोचरं विषयमालोक्य परिच्छिद्य संविद्दीप्त्या ज्ञेयं विलाप्याऽविभागं नीत्वेत्यर्थः । मयैव चोक्तं भोग-मोक्षप्रदीपिकायाम्—

'अथवा विभागबोधज्वलनेन विलाप्य वेद्यपीयूषम् ।
पीत्वा तृप्तो विचरेन्नीरोगो योऽचिरात्सदैकाकी ॥

१. B. reads ज्ञेय,° but it seems incorrect.

एतत्क्रमार्थसारं परधाराभूमिका च शक्तीनाम् ।
तदनुज्ञयाऽत्र कथितं स्वच्छिष्यविबोधनाय यथा' ॥

इति । यतः सा निर्विभागा । उक्तं हि–

'देश-काल-क्रियाकाराः प्रसिद्धा भागहेतवः ।
ते न सन्ति पुनर्यस्य विभागस्तस्य किंकृतः ?' ॥

इति । अन्यच्च–

'मनः सविषयं दाह्यं ज्ञानाग्निर्दर्शनैर्दहेत् ।
अन्तर्बहिर्मुखश्चैवं समाधिरुपपद्यते' ॥

इति । तथा–

'विज्ञानवाडवो दीप्तः स्वशक्त्या चेयतोयधीन् ।
अजस्रं ग्रसते, नान्यस्तद्ग्रासे शक्तिमान्भवेत् ॥
नाऽप्राप्या पयसां तृष्णा प्राप्या वा भूयसामपि ।
यस्यास्ति कृतकृत्यत्वं कोऽप्यसौ वडवामुखम्' ॥

इति । प्राक्चैतत्सोपपत्तिकं वितत्योक्तम् । 'यस्मात्सर्वमयो जीवः'– इत्यादि । एवमेकत्र तत्वस्वभावे विद्यात्मके ज्ञानरूपे सर्वमारोपयेदैक्यं नयेत् । अत एव ततोऽन्येन वक्ष्यमाणेन कलासमूहेन शक्त्यात्मकेन विकल्परूपेण न पीड्यते बाध्यते[2] न स्वरूपात्प्रच्याव्यते इत्यर्थः । उक्तं च–

'एकं व्याप्ति व्योम-कुड्यादियोगात्तस्मिन्बाह्याऽभ्यन्तरत्वं तथा त्वाम् ।
पश्यत्येकं ग्राहक-ग्राह्यरूपं व्याप्तिप्राप्तेष्यत्तनस्त्वत्समाधिः' ॥

इति ॥ ४४ ॥

एवं यः प्रबुद्धः पतिः सोऽन्येन न पीड्यते । अर्थाद्योऽप्रबुद्धः पशुः स हन्यते । सच कथं किं लक्षणश्चेत्युच्यते–

शब्दराशिसमुत्थस्य शक्तिवर्गस्य भोग्यताम् ।
कलाविलुप्तविभवो गतः सन्स पशुः स्मृतः ॥ ४५ ॥

इति । शब्दानां राशिः शब्दराशिः वर्णसमूहो मातृका अकारादिक्षकारान्ता शब्दजननी । वर्णात्मकत्वाच्छक्तीनाम् । तत्समुत्थस्य कादिवर्गात्म-

---

१. B. reads मतः and °गात् for °गा. २. A. inserts वा before बाध्यते.

कस्य । ब्राह्म्यादिशक्तिचक्रस्य कलाभिः ककाराद्यक्षरैर्विलुप्तविभवो हृतमहाव्याप्तिः स्वभावात्प्रच्यावितोऽत एवास्य भोग्यतां गतः सन्पुरुषः पशुरुच्यते। अज्ञत्वात् । उक्तं च ईश्वरप्रत्यभिज्ञायाम्—

'स्वाङ्गरूपेषु भावेषु प्रमाता कथ्यते पतिः ।
मायातो भेदिषु क्लेशं कर्मादिकलुषः पशुः' ॥

इति । क्वापि च—

'भेदग्रन्थिविभेदे हि कर्मात्मैक्यं प्रपद्यते ।
सो ऽविज्ञातः पशुः प्रोक्तो विज्ञातः पतिरेव सः' ॥

इति ॥ ४५ ॥

अतश्च—

परामृतरसापायस्तस्य यः प्रत्ययोद्भवः ।
तेनाऽस्वतन्त्रतामेति स च तन्मात्रगोचरः ॥ ४६ ॥

इति । तस्य च पशोर्यः प्रत्ययोद्भवः श्रोत्रादिद्वारेण विषयदर्शनेन स्मरणादिज्ञानोत्पत्तिः स एव परामृतरसात्स्वस्वरूपोदयादपायः प्रच्युतिः । यतः तेन स पुमानस्वतन्त्रतां पारतन्त्र्यमसर्वगतत्वाद्यमेति प्राप्नोति । स च प्रत्ययोद्भवस्तन्मात्रगोचरः शब्दादिविषयविषयस्तदभिलाषात्मक इत्यर्थः ॥ ४६ ॥

अत एव च—

स्वरूपावरणे चास्य शक्तयः सततोद्यताः ।
यतः शब्दानुवेधेन न विना प्रत्ययोद्भवः ॥ ४७ ॥

इति । अस्य च पुंसः स्वरूपावरणे स्वस्वभावाच्छादने शक्तयः पूर्वोक्ता ब्राह्म्याद्याः शब्दरूपाः क्रियाशक्तिद्वारेण सततमुद्यताः सदा सन्निहिताः पुंरूपकल्पनाय । यतः शब्दानुवेधेन वर्णानुगमेन विना न प्रत्ययोद्भवो ज्ञानसंवेदनमस्ति । शब्दा यत्तत्वात्पदार्थस्य वाच्य-वाचकयोरन्योन्यद्योतकत्वाच्च । तथा चोक्तं वाक्यप्रदीपे—

'नसोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन दृश्यते' ॥

इति । प्राक्चोक्तं हि 'वागेवास्याः कारणं विश्ववृत्तेः'—इत्यादि ।

१. B. reads मायातो. २. B. °विभागे. ३. B. reads °दर्शने. ४. B. reads °प्रदीपे.

अन्यत्र—

'वायूपता चिदुत्क्रामे देव बोधस्य शाश्वती ।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी' ॥

इति ॥ ४७ ॥

अथास्या एव क्रियाशक्तेर्बन्ध-मोक्षहेतुतामाह—

सेयं क्रियात्मिका शक्तिः शिवस्य पशुवर्तिनी ।
बन्धयित्री स्वमार्गस्था ज्ञाता सिद्ध्युपपादिका ॥ ४८ ॥

इति । येषा अज्ञानां बन्धयित्री बन्धजननी भवेत् । अक्रियात्मिका क्रियास्वभावाऽशक्ता सैवेयं शिवस्य सुप्रबुद्धस्य पशुवर्तिनी पशुवद्व्यवहृविनियोज्यतया या वर्तते सा तथोक्ता । सा च स्वमार्गस्था मदीयेति ज्ञाता सिद्ध्युपपादिका परापरसिद्धिप्रदा भोग-मोक्षावहेत्यर्थः । अर्थाच्च भिन्ना ज्ञाता बन्धदा भवतीति । अथवेयं व्याख्या । सेयमित्याद्यन्यैस्तुल्यार्थः । स्वमार्गस्था स्वतन्त्रा अज्ञाता बन्धयित्री । ज्ञाता तु सिद्ध्युपपादिकेति । उक्तं चैतत्प्राक् 'प्राणिनां पतनं येन'—इत्यादिना ॥ ४८ ॥

कथं त्वेषा बन्धहेतुतामापद्यते तत् स्फुटीकर्तुमाह—

तन्मात्रोदयरूपेण मनोऽहम्बुद्धिवर्तिना ।
पुर्यष्टकेन संरुद्धस्तदुत्थप्रत्ययोद्भवम्—॥ ४९ ॥
भुङ्क्ते परवशो भोगं तद्भावात्संसरेदतः ।
संसृति-प्रलयस्याऽस्य कारणं संप्रचक्ष्महे ॥ ५० ॥

(सन्दानितकम् ।)

इति । पुर्यष्टकस्य किल द्वे रूपेस्तः । एकं सूक्ष्ममातिवाहिकाख्यं तन्मात्रमभिलापात्मकम् । द्वितीयं स्थूलं भौतिकं भोगाख्यम् । तत्र सूक्ष्मेण पुर्यष्टकेन संरुद्धः बद्ध आवृतः अत एव परवशः सन् तदुत्थप्रत्ययोद्भवं सुख-दुःखसंवेदनरूपं भोगं भुङ्क्ते अश्नाति । कीदृशं ? तन्मात्राणां शब्दादीनामनुभवद्वारेण य उदयोऽऽभिव्यक्तिः स एव रूपं यस्य तेन तथा मनोहङ्कारबुद्धिवर्तिना चान्तःकरणसंयुक्तेन । तस्य च पुर्यष्टकस्य भावात्तद्वशाच्छरीरी

१. A. does not insert या. २. B. does not insert °न्य°.

संसरेत्संसारं याति । अत एवास्य संसृति-प्रलयस्य जननमरणप्रवाहस्यैतदेव कारणं हेतुं संप्रचक्ष्महे कथयामः ॥ ४६–५० ॥

एवं बन्धनिमित्तमुपवर्ण्यास्योच्छेदायोपायमाह—

यदा त्वेकत्वसंरूढस्तदा तस्य लयोद्भवौ ।

नियच्छन्भोक्तृतामेति ततश्चक्रेश्वरो भवेत् ॥ ५१ ॥

इति । एवम्—

'बन्ध-मोक्षविचारेण प्रबोधाख्या यदा पुनः' ।

इति । पुर्यष्टकद्वयमध्यादेकस्मिन्पुर्यष्टके स्थूले सूक्ष्मे वा पतित्वेन संरूढो लीनचित्तस्तदा तस्य तदुत्थप्रत्ययोद्भवस्य शब्दादेर्लयोद्भवौ प्रध्वंस-प्रादुर्भावौ नियच्छन्स्वेच्छया कुर्वन्भोक्तृतामेति । प्रभुत्वं प्राप्नोति । भोग्यरूपात्पशुत्वान्मुच्यते इत्यर्थः । तदुक्तम्—

'पशूनां तु पतिर्भूत्वा पशूनां तु पतिर्भवेत् ।
पशुत्वान्मुच्यते सद्यो भूत्वा पशुपतेः पतिः' ॥

इति । स्वबोधोदयमञ्जर्यां च—

'यद्यन्मनोहरं किंचिदक्षिगोचरमागतम् ।
एकाग्रं भावयेत्तावद्यावल्लीनं निरोधकृत्' ॥

इति । एवं सति स्वातन्त्र्याप्तेस्ततश्चक्रेश्वरः शक्तिचक्रस्वामी सर्वज्ञतादियुतः सर्वाधिपतिर्भवेदित्यर्थः ॥ ५१ ॥

एवमस्याद्यश्लोके शक्तिचक्रैश्वर्यं यदुक्तं तदिहाऽपि—

अथेत्थं ग्रन्थनिष्पत्तेर्ग्रन्थकर्ता गुरोर्गिरम् ।
प्रहर्षवशतस्तौति नीतिं शिष्यांश्च शिक्षयन्—॥

अगाधसंशयाम्भोधिसमुत्तरणतारिणीम् ।

वन्दे विचित्रार्थपदां चित्रां तां गुरुभारतीम् ॥ ५२ ॥

इति । तामहं गुरुभारतीं वन्दे । कीदृशीं? दुरवगाहसन्देहार्णवपारोत्तारिणीम् । अन्यच्च विचित्रोऽर्थोऽभिधेयो विचित्राणि पदानि शब्दा यस्याः सा तथोक्ता । अत एव चित्रामाश्चर्यभूतामाचार्यसरस्वतीं स्तौमि । न हि गुरोर्गरीयानन्योऽस्ति । तदुक्तं जयायाम्—

'यस्माद्देवो जगन्नाथः कृत्वा मन्त्रमयीं तनुम् ।
मग्नानुद्धरते लोकान्कारुण्याच्छास्त्रपाणिना' ॥

इति । नारदसङ्ग्रहे च–

'गुरवे दक्षिणां दद्यात्सर्वस्वं सार्धमेव वा ।
सर्वस्वमथ वा ऽत्यल्पं संसारोच्छेदहेतवे' ॥

इति । मयैवोक्तं क्वाऽपि–

'भगवत्प्राप्तिकामो यस्तेनान्वेष्यो गुरुर्यतः ।
भगवाञ्ज्ञायते शास्त्राच्छास्त्रं च ज्ञायते गुरोः ॥
तद्बोधात् ज्ञानविलयाज्ज्ञानाप्तौ प्राप्त एव सः ।
तस्माच्छास्त्रादीश्वराच्च गरीयान्गुरुरुच्यते' ॥

इति । पञ्चरात्रेऽपि–

'यथा भगवत्येव वक्तरि वृत्तिः' ।

इति ॥ ५२ ॥

अथाम्नायक्रमवर्णनद्वारेण सङ्ग्रहकृत्कीर्त्यर्थं श्लोकेनोपबध्नाति–

वसुगुप्तादवाप्येदं गुरोस्तत्वार्थदर्शिनः ।
रहस्यं श्लोकयामास सम्यक् श्रीभट्टकल्लटः ॥ ५३ ॥

इति । अस्यार्थः प्रारम्भ एवोक्तः इति पुनर्नोच्यते । इदं च ब्रह्मविद्याबीजं नाऽपरीक्ष्याऽस्थाने वपेत् । उक्तं ह्यनेनैवाऽन्यत्र–

'गुणैरुपेताऽपि तु सिद्धविद्या कन्येव दत्ता गुणवर्जिताय ।
सम्भोगहीना विदधात्यकीर्तिं दातुर्यतस्तत्प्रगुणाय दद्यात्' ॥

इति ॥ ५३ ॥

इत्यविद्यातमःस्थानां दर्शनाय प्रकाशिता ।
सतां सुपर्णादेशेव शुद्धामलगुणोज्ज्वला ॥ १ ॥
वाग्लुण्ठनार्थमन्येषां विद्वन्मन्यतयाऽपि तु ।
शुद्धबोधोल्लासवशात्कृता स्पन्दप्रदीपिका ॥ २ ॥
तस्मात्प्रोत्सार्य मात्सर्यमर्थमथ विचार्य च ।
आर्यैराश्चर्यभूताया न कार्योऽस्या अनादरः ॥ ३ ॥

नारायणस्थानज उत्पलाख्यस्त्रिविक्रमाख्यस्य सुतोऽग्र्यजन्मा ।
यस्तेन सच्छिष्यहिताय दृब्धा व्याख्या मयैषा च तमोनुदे स्यात् ॥ ४ ॥
गतिः स्खलन्ती न क्वचिद्यया निशि स्याद्दीपहस्तस्य तथा स न क्वचित् ।
स्खलत्यमार्गेऽपि करेऽस्ति यस्य हि प्रदीपिकेयं प्रगुणप्रकाशिका ॥ ५ ॥

किं वा बहूक्तिभिरिमां तु सरस्वतीं मे
बोधद्रुमोत्तमसृतां परतीर्थयुक्ताम् ।
स्वच्छां विगाह्य विबुधत्वमुपैति मर्त्यो-
ऽप्यत्यक्तदेह इह चित्रमतः परं किम् ॥ ६ ॥

इत्याचार्यभगवतोत्पलविरचिता स्पन्दप्रदीपिका समाप्ता ॥

शुभं भूयात् ।

पुस्तक विवरण की तिथि नीचे अंकित है। इस तिथि सहित ३० वें दिन यह पुस्तक पुस्तकालय में वापस आ जानी चाहिए अन्यथा ५० पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा।

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या